सितम्बर 2002
आर० एन० आई० सं० 58951/94

## संस्कृतप्रसारपरिषद्, आरा

### प्रकाशनम्

1. मेघदूतम् (सभूमिका-हिन्दीपद्यानुवादसहितम्)
   – स्व० पण्डित कमलाकान्त उपाध्यायः
   15 रूप्यकाणि
2. भोजपुरी नीतिसतक (भर्तृहरि 'नीतिशतक' स्य भोजपुरी-पद्यानुवादः)
   – श्री देवकुमार मिश्रः 'अलमस्त'
   15 रूप्यकाणि
3. पण्डित दीनदयाल उपाध्याय के 'एकात्ममानवदर्शन' की मीमांसा
   – श्री नर्मदेश्वर ओझा
   15 रूप्यकाणि
4. माण्डूक्योपनिषद्-'नलिन-भाष्य' –पं०जगदीश्वर प्रसाद मिश्र 'नलिन'
   35 रूप्यकाणि
5. भरतचरितम् (महाकाव्यम्) – स्व० भवानीदत्त पाण्डेयः
   51 रूप्यकाणि
6. राष्ट्रियता : सांस्कृतिक अवधरणा – श्री नर्मदेश्वर ओझा
   51 रूप्यकाणि
7. संस्कृतनिबन्धसञ्चयनम् – पं० व्रजभूषण मिश्र 'आक्रान्तः'
   41 रूप्यकाणि
8. ईशावास्योपनिषद् एवं केनोपनिषद्-'नलिन-भाष्य'
   – श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
9. आध्यात्मिकनिबन्धसंग्रह – श्री जगदीश्वर प्रसाद मिश्र 'नलिन'
   51 रूप्यकाणि
10. उपेन्द्रविज्ञानदर्शनम् (वेदान्तग्रन्थः) – स्व० पं० उपेन्द्रनारायणदत्त शर्मा
    41 रूप्यकाणि
11. भावनाविलासशतकम् – स्व० पण्डित उपेन्द्रनारायणदत्त शर्मा
    21 रूप्यकाणि
12. महाभारतसारसंग्रहः (प्रकाश्यः) – स्व० पण्डित वचन मिश्रः

# आरण्यकम्

अर्धवार्षिकं संस्कृतशोधपत्रम्

संस्कृतप्रसारपरिषद्
आरा (विहारः)

सितम्बर 2002

# आरण्यकम्

संस्कृतप्रसारपरिषदः अर्धवार्षिकं शोधपत्रम्

वर्षम् – नवमम् अङ्कः – द्वितीयः

अश्विनः, वि० सं० २०५९

सितम्बर, २००२

प्रतिवर्षं प्रकाशनकालः

चैत्रः, आश्विनः-विक्रमाब्दः

मार्च, सितम्बर

प्रत्यङ्कम् - १५ रूप्यकाणि वार्षिकं शुल्कं ३० रूप्यकाणि

**परामर्शदात्री समितिः**

पण्डित वासुदेव द्विवेदी, वाराणसी
डॉ० सुरेशचन्द्र गो० काण्टावाला, बड़ोदरा
डॉ० हरिहर झा, दरभङ्गा
डॉ० उमाशङ्कर शर्मा 'ऋषिः', पटना
डॉ० भागीरथ त्रिपाठी 'वागीशः शास्त्री', वाराणसी
डॉ० राय अश्विनी कुमारः, बोधगया

*संस्थापकः*
स्व० पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

*सम्पादकः*
डॉ० गोपबन्धु मिश्रः

*सहसम्पादकः*
डॉ० सुनीलकुमार प्रधानः

*प्रकाशिका*
संस्कृतप्रसारपरिषद्
मारुतिमन्दिरम्
प्रकाशपुरी, आरा (विहारः) 802301
दूरभाषा - (06182) 224193

संस्कृतप्रसारपरिषद्, आरा पक्षतः डॉ० गोपबन्धु मिश्रेण, आरा प्रिन्टर्स, गोला मुहल्ला, आरा, बिहार-802301 इत्याख्ये मुद्रणालये मुद्रितं प्रकाशितं च ।

डॉ० गोपबन्धु मिश्रः

# सम्पादकीयम्

लोके परोपदेशे पाण्डित्यं सर्वत्र दृश्यते । शारीरिकं दुःखं भवतु, कोऽपि उपदेशकः सुलभतया उपदिशति – 'प्रातः उत्थाय अटतु, योगाभ्यासं करोतु' आदि । मानसिकस्तापः अस्ति, प्रतिवेशी अथवा कश्चित् अकारणबन्धुरुपदिशति– 'कथं त्वम् अशोच्यान् अन्वशोचः ? दुःखेषु अनुद्विग्नमनाः स्याः' इत्यादि । कोऽपि तापः सन्तापः उत्तापः वा नास्ति, तथापि कोऽपि सहयात्री सगर्वमुपदिशति– 'सर्वैः देशवासिभिः रेलसम्पत्तिः रक्षणीया, सुखदरेलयात्रायै रेलप्रशासनस्य सहायता करणीया' आदि । एवमेव लोकव्यवहारस्य विविधेषु क्षेत्रेषु एकः अपरम् उपदिशतीति दृश्यमतीव सामान्यम् । सोऽपि उपदेशकः अपरस्मिन् स्थले अपरेण केनचित् उपदिष्टो भवतीति उपदेशप्रदानपरम्परा प्रसृता परिलक्ष्यते । किन्तु यस्मिन् विषये कश्चित् तदितरमुपदिशति तस्मिन्नेव विषये तस्य आचरणं सर्वथा निश्चितं नैव लक्ष्यते, अपरं तु तस्य सम्बद्धविषये प्रायशो विपरीताचरणमेव परिलक्ष्यते । अतः एतादृशेन परोपदेशपाण्डित्येन उपदिष्टवाक्यानाम् अननुपालनजन्या अस्वस्थैव परम्परा प्रचलति । स्वपुत्रस्य अधिकगुडसेवनेन क्षुब्धः कश्चित् पिता एकं साधुं तस्य निराकरणोपायं पृष्टवान् । साधुः अपरस्मिन् सप्ताहे पुत्रमादाय आगन्तुमुक्तवान् । यथासमयम् आगतं तत्पुत्रं साधुः अधिकगुडसेवनस्य दोषान् उक्तवान् । गते सप्ताहे एव कथमेते दोषा नोक्ताः इति पृष्टे सति साधुरुत्तरितवान् 'तदा मयाऽपि अधिकं गुडः सेव्यते स्म । इदानीमधिकगुड़सेवनं परित्यज्य तस्य गुणान् अवगत्य एव यत् किंचित् उच्यते तदेव प्रामाणिकं खलु ?'

संस्कृताध्येतॄणां विषयेऽपि उपर्युक्तलोकव्यवहारः प्रायशः परिलक्ष्यते । 'निष्कारणो वेदः षडङ्गोऽध्येयो ज्ञेयश्च' इति उपदेशवाक्यमुद्धरन्तस्ते सामाजिकान् अपरान् बोधयन्ति । शब्दज्ञानसमृद्धये अमरकोशः अभ्यसनीयः, शब्दानुशासनाय कौमुदी नित्यं पठनीया, रम्या रामायणी कथा साक्षात् (न अनुवादपरम्परया) अवगन्तव्या, कालिदासस्य उपमा ज्ञातव्याः, पदलालित्याय नैषधं सेव्यम् इति बहूनि उपदेशवचनानि प्रवचन-निबन्धलेखन-संस्कृतस्तुतिगायनादिषु प्रसङ्गेषु संस्कृताध्येतॄणां मुखतः श्रूयमाणानि सन्ति । किन्तु तेषु ये स्वयम् एतान् ग्रन्थान्

अभ्यस्य वदन्ति तादृशानां संख्या अतीव अल्पीयसी एव । क्रमशः अनभ्यासपरम्परायां एषा संख्या ह्रासतां भजमाना दृश्यते इति संस्कृतजगतः कृते उद्वेगस्य चिन्तायाः वा विषय एषः ।

संस्कृतेन नवीनानि गीतानि रूपकाणि कविताः कथाः उपन्यासाः आलोचनाः च लिख्यमानाः प्रकाश्यमानाश्च सन्ति । अर्थात् आधुनिककाले साहित्यस्य सर्वविधाः प्रयोगाः संस्कृतेन क्रियमाणाः सन्ति । संस्कृतेन विविधाः पत्रिकाः प्रकाश्यन्ते, दूरदर्शने आकाशवाण्यां च संस्कृतसमाचाराः प्रसार्यन्ते । किन्तु तत्तद्ग्रन्थानां पाठे, संस्कृतपुस्तकक्रयणे, नवीनरचनाविषयकजागरणे, पत्रिकापठने समाचारश्रवणे च प्रवर्त्तमानानां संस्कृतज्ञानां संख्या न्यूना एव । अतः आगामिनि काले एतेषु क्षेत्रेषु संस्कृतस्य दिग्दिगन्तव्यापिनीं विस्तृतिं काङ्क्षमाणानां संस्कृतज्ञानां कृते कदाचित् संस्कृतस्य वर्तमानायाः अपि क्षीणतरा संकीर्णा वा व्याप्तिः दृश्यमाना न स्यात् इत्येतदर्थं सद्यः आरभ्य यत्नः करणीयः । तादृशो यत्नः 'उद्धरेदात्मनाऽऽत्मानम्' इत गीतोपदेशपालनेन प्रारभ्येत । 'धर्मो रक्षति रक्षितः' इति वचनात् संस्कृतभाषासमृद्धिं काङ्क्षमाणानां कृते संस्कृतभाषारचितज्ञानविज्ञानैः आत्मसमृद्धिः साधनीया अस्ति । वैयक्तिकजीवने शास्त्राणि स्वाध्यायद्वारा अभ्यसनीयानि, ततश्च मित्रैः अपरैः सह मिलित्वा एकत्र वाल्मीकि-कालिदास-माघ-भारवि-श्रीहर्ष-बाणभट्टादिकाव्यवाचन-परम्परा च तैः प्रारब्धव्या । केवलमेतेनैव पठन-वाचनक्रमेण जनमनसि संस्कृतविद्यां प्रति या श्रद्धा अन्तर्निहिता विद्यते सा पुनः पुष्टिं प्राप्स्यति । तेषु श्रद्धालुषु केचित् पुनः एतां विद्यां पठितुमवगन्तुं च प्रयतिष्यन्ते, प्रयतमानेषु च केचित् विशिष्टतामवाप्स्यन्ति इति "मनुष्याणां सहस्रेषु" इत्यादि गीतावचनमत्र सफलं भविष्यति । अतः प्राथमिकावस्थायां संस्कृतविद्यायां यत्नशीलानां प्रवृत्तिः स्यात् इत्येतदर्थं संस्कृतज्ञैः पुरोगामिभिः भवितव्यम् । तेषां गृहतः आरभ्य संहतिं यावत् सर्वत्र एतेषां शास्त्राणां काव्यानां च कृते व्यावहारिकी श्रद्धा सुस्पष्टा भवेत् ।

संस्कृतभाषा भारतीयसंविधानस्य अष्टम्याम् अनुसूच्याम् उल्लिखितासु भाषासु अन्यतमास्ति । अतः तासां हिन्दी-गुजराती-मराठी-तेलगू-तामिल-बंग-आदीनाम् इव संस्कृतभाषाया अपि आधुनिकभारते समाना मर्यादा स्यात् । केन्द्रीयमाध्यमिकशिक्षापरिषदः नवीनपाठ्यक्रमे आङ्ग्लभाषाया अनिवार्यम् अध्ययनं विहितम् अस्ति । ततः परम् आधुनिकभारतीयभाषाया अध्ययनं द्वितीयभाषारूपेण कर्तुं शक्यम् । एतावत्पर्यन्तं संस्कृतं प्राचीनभाषा (Classical Language) रूपेण परिगणितमस्ति । पालि-प्राकृत-अरबी-पर्सियन इति चतसृभिः भाषाभिः सह पञ्चम--प्राचीनभाषारूपेण संस्कृतस्य परिगणनं क्रियमाणमस्ति । परन्तु ताः चतस्रः संविधानस्य उक्तायाम् अनुसूच्यां गृहीताः न सन्ति । अतः वस्तुतः संस्कृतभाषा हिन्दी-गुजराती-आदिवत् आधुनिकभारतीयभाषा (Modern Indian Language) रूपेण परिगणिता स्यात् । केन्द्र-साहित्य अकादमीद्वारा मान्यभाषासु संस्कृतम् अस्ति, न तु पालिप्राकृतादयः ताः चतस्रः । दूरदर्शन-आकाशवाणीतः आधुनिकभारतीयभाषाभिः समाचाराः प्रसार्यन्ते, अतः तत्र संस्कृतस्य स्थानमस्ति, न तु पाल्यादीनां चतसृणाम् । अर्थात्, संस्कृतम् एका आधुनिकभारतीयभाषाऽस्ति, न तु प्राचीनभाषामात्रम् इति आस्माकीनो विचारः । दुःखस्याऽयं विषयो यत् इदानीमपि भारतीयसंविधाने आधुनिकभारतीयभाषायाः परिभाषा स्पष्टतया कृता नास्ति । भारतसर्वकारस्य मानवसंसाधनविकासमन्त्रालयस्य पुरतः अस्माकमिदं निवदनं यत् भारतीयसंविधानस्य अष्टमानुसूच्यां गृहीताः भाषाः 'आधुनिकभारतीयभाषाः' इति स्पष्टं परिभाषिताः भवन्तु । तेन संस्कृतं सांविधानिकविवेकेन आधुनिकभारतीयभाषारूपेण स्थानं प्राप्तुं शक्ष्यति । भारतीयाः नागरिकाश्च उक्तं मानवसंसाधनविकासमन्त्रालयं प्रति 'अष्टमानुसूच्यां गृहीताः भाषाः आधुनिक-भारतीयभाषाः भवन्तु' इति आशयकं पत्रमवश्यं लिखन्तु इति ते बन्धवोऽपि अनुरुध्यन्ते ।

आरण्यकस्यास्य संस्थापकः प्रधानसम्पादकः संस्कृतप्रसारपरिषदः अध्यक्षश्च पण्डित व्रजभूषण मिश्र 'आक्रान्त' महोदयः ऐहिकीं लीलां संहृत्य ३० मार्च,२००२ दिनाङ्के दिवंप्रयात इति सम्पूर्णपरिषत्परिवारः अतीव मर्माहतः सन् तादृशं दुःखं सोढुम्, पुण्यात्मनः 'आक्रान्त' महोदयस्य च संस्कृतसेवासरणीमनुसर्तुं शक्तिमिच्छन् परमेश्वरं सुतरां प्रार्थयमानः अस्ति ।

अस्मादङ्कात् आरभ्य आरण्यकस्य सहसम्पादकरूपेण डॉ॰ सुनीलकुमार प्रधानः परिषदः कार्यकारिण्या मनोनीतोऽस्ति । प्रधानमहोदयस्य स्वागतं व्याहरामः ।

नानाविधैः कारणैः आरण्यकस्य प्रकाशने विलम्बो जातः । भविष्यति अस्य नियतकालिकं प्रकाशनं सुनिश्चेतव्यमस्ति ।

सितम्बर 2002

**सम्पादकः**

# सूचीपत्रम्


| विषयः | लेखकः | पृष्ठम् |
|---|---|---|
| १. ब्रह्मशब्दार्थविमर्शः | डॉ॰ असहाब अली<br>संस्कृतविभागः<br>दीदउ गोरखपुर विश्वविद्यालयः<br>गोरखपुरम् | १ |
| २. सिद्धान्तकौमुद्याः अनुबन्धविषये वैमत्यम् | डॉ॰ सौ॰ भाग्यलता पाटसकर<br>निदेशिका, वैदिकसंशोधनमण्डलम्<br>टि भ वि नगरम्, पुणे-36 | ७ |
| ३. शाकुन्तलस्य चतुर्थाङ्के कारुण्यम् | वकील प्रसाद यादवः<br>शोधच्छात्रः, संस्कृतविभागः<br>वीर कुँवर सिंह विश्वविद्यालयः<br>आरा | १५ |
| ४. भारतं पञ्चमो वेदः | डॉ॰ विजय कुमारः<br>ग्रामः – लदमा<br>पोस्ट – आलम नगर<br>जिला – मधेपुरा (विहार) | १९ |
| ५. (पुस्तकसमीक्षा) बुभुक्षा | रचयिता-डॉ॰ बनमाली बिश्वालः<br>समी॰ डॉ॰ सुनीलकुमार प्रधानः | २३ |
| परिशिष्टम्<br>संस्कृतसौरभसञ्चयनम्<br>(पञ्चमं पुष्पम्)<br>श्रवणकुमारचरितम् | प्रणेता-पण्डित व्रजभूषण मिश्र 'आक्रान्तः'<br>सम्पादकः - डॉ॰ गोपबन्धु मिश्रः | |


# ब्रह्मशब्दार्थविमर्शः


डॉ॰ असहाब अली


'वेदोऽखिलो धर्ममूलमि'ति भारतीया मान्यतास्ति । अतः वेदेभ्यः पश्चात्कालीनाः याः सरणयः सन्ति ताः सर्वा अपि इत एव निःसृताः सन्ति । वेदे प्रयुक्तेषु बहुषु महनीयेषु शब्देष्वेकः शब्दोऽस्ति 'ब्रह्मन्' इति । निबन्धेऽस्मिन्नस्यैव शब्दार्थः विवेच्योऽस्ति । अस्य शब्दस्य निष्पत्तिः वृद्ध्यर्थकात् 'बृंह्' धातोः मनिन्-प्रत्यये कृते सम्भवति । अयं शब्दः वेदिकसाहित्येऽनेकेष्वर्थेषु प्रयुक्तो वर्तते । केषु केष्वर्थेष्वस्य शब्दस्य प्रयोगोऽभूत् वेदे इत्यत्र क्रमेण विवेच्यते ।

**1. स्तोता**- ब्रह्मशब्दस्य प्राक्तनार्थोऽस्ति देवानां स्तुतिकर्ता । प्रायः स्तोतारः स्वस्तुतिभिः देवानप्रीणयन् । एवं स्तुतिकर्तुः कृते ब्रह्मशब्दस्य प्रयोगो दृश्यते । एकस्मिन्मन्त्रस्य भाष्ये[1] सायणाचार्यमहोदयेन 'ब्रह्म'शब्दस्य 'स्तोता' इत्यर्थः कृतः । इत्थमेव सन्ति बहवः मन्त्राः यत्रायं शब्दः स्तोतृनिमित्त एव प्रयुक्तोऽस्ति ।[2]

**2. देवानां स्तुतिः**- यथायं शब्दः स्तुतिकर्तृहेतुः वेदेषु दृश्यते तथैवास्य प्रयोगो देवानां स्तुतावपि प्रयुज्यते । स्तुत्या एव ऋषयः देवानां तुष्टिमकुर्वन् । स्तुतिभिः तुष्टो देवः स्तोतारमभीष्टं प्रददाति स्म । सायणाचार्यमतेऽपि ब्रह्मन्-शब्दस्यायमेवार्थः । **'हे इन्द्र ! मम ब्रह्म अस्मदीयमेव स्तुतिः'.......**।[3] अत्र ब्रह्मशब्दस्य स्तुतिरेवार्थः कृतः । एवमेवान्येषु मन्त्रेष्वप्ययमर्थोऽभिप्रेतोऽस्ति ।[4]

**3. मन्त्रः स्तोत्रं वा** - मन्त्रा एव ऋषीणां साधनानि आसन् देवानां स्तवनस्य । अत्र तु सायणाचार्यस्य भाष्यमुदाहरणीयम्- **'नव्यं नूतनं ब्रह्म एतत्सूक्तस्य ब्रह्म स्तोत्रं नः अस्मदर्थे अतक्षत अकरोत्** ।'[5] एवमेव **'अध्वरे यागे ब्रह्म स्तोत्ररूपं मन्त्रं हविर्लक्षणमन्नं वा.......**।[6] अन्येष्वपि मन्त्रेषु ब्रह्मशब्दस्य मन्त्रः स्तोत्रं वार्थः प्राप्यते ।[7]

4. **वेदः** - ब्रह्मचर्यशब्दे ब्रह्मपदस्यार्थो वेद इति प्रज्ञायते । ब्रह्मणः ाचरणस्य तात्पर्यं भवति वेदाध्ययनम् । अत एवात्र ब्रह्मशब्दः वेदशब्दस्य र्यायोऽस्ति । एवमेव '**ब्रह्मवादिन्**' शब्देऽप्ययमेवार्थः परिलक्ष्यते । अथर्ववेदे[8]ऽनेकेषु न्त्रेष्वयं शब्दोऽस्मिन्नेवार्थे प्रयुक्तो दृश्यते ।

5. **पुरोहितः** - ब्रह्मशब्दस्य प्राचीनार्थ आसीत् स्तोतेति । परं तु पश्चाद्वर्तिनि काले जनेष्वेको वर्गः समजनि यस्य कार्यमभूत् जनानां कृते देवतायाः स्तुतीकरणम् । यज्ञेषु देवानां स्तुतिकार्येऽयं वर्गः निष्णात आसीत् । व्यवहारेऽस्य वर्गस्य 'पुरोहित' इति नाम आसीत् । ऋग्वेदे बहवः मन्त्राः सन्ति येषु ब्रह्मशब्दस्य प्रयोगः पुरोहितानां वर्गविशेष एव कृतो विद्यते ।[9]

6. **ब्राह्मणः** - 'ब्रह्मन्' शब्दस्यार्थः 'ब्राह्मण' इत्यपि प्राप्यते । अस्यार्थो भवति 'ब्रह्म वेदं शुद्धं चैतन्यं वा वेत्त्यधीते वा' । वेदाध्ययनकर्ता ब्राह्मणो भवति । एवमेव शुद्धचैतन्यस्य साक्षात्कर्तापि स एव भवति । ऋग्वेदस्यानेके मन्त्राः सङ्केतयन्ति यदस्य शब्दस्यास्मिन्नेवार्थे प्राचुर्येण प्रयोगोऽभूत् । सायणाचार्योऽत्रोदाहरणीयः '**ब्रह्मणि ब्राह्मणे अस्मिन् यजमाने हविः स्वीकरणाय हृष्यथः । यदि वा राजनि क्षत्रिये युद्धे साहाय्यं कर्तुमागत्य हृष्यथः** ।[10] एवमेवैकस्मिन्मन्त्रे ब्रह्मन्-शब्दोऽत्रिनामधेयस्य ब्राह्मणस्य कृते प्रयुक्तोऽस्ति ।[11] 'ब्रह्महत्या' इति बहुप्रचलिते शब्देऽपि ब्रह्मपदस्यायमेवार्थः ।

7. **ब्रह्मा (पुरोहितः)** - यज्ञानुष्ठाने होत्रध्वर्यूद्गातॄणां मध्ये ब्रह्मा विशिष्टः ऋत्विगस्ति । अयं यज्ञस्याधिष्ठाताधीक्षकोऽपि भवति । अस्याध्यक्ष्य एव यज्ञस्य सर्वाण्यनुष्ठानानि भवन्ति । वैदिकग्रन्थेषु प्रयुक्तस्य ब्रह्मशब्दस्य ब्रह्मा (पुरोहितः) इत्यप्यर्थोऽस्ति न वा इत्यस्मिन् विषये विद्वांसः विवदमानाः सन्ति । त्सिमिर[12]महोदयस्येयं शङ्कास्ति यत् ऋग्वेदे प्रयुक्तः 'ब्रह्मा' यज्ञस्याधिष्ठातुः कृतेऽस्ति न वा ? परं त्वयं शब्दो यज्ञस्याधीक्षकार्थे प्रयुक्तोऽस्ति' इति म्योर[13] महोदयः राथ[14] महोदयश्च मन्येते ।

8. **ब्राह्मणाच्छंसी** - वैदिकयज्ञानुष्ठातॄणां पुरोहितानां चतुर्वर्गाः सन्ति-होतृगणः, अध्वर्युगणः, उद्गातृगणः, ब्रह्मगणश्च । ब्रह्मगणमध्ये चत्वारः ऋत्विजः सन्ति-ब्रह्मा, ब्रह्मणाच्छंसिन्, आग्नीध्रः, पोता च । ओल्डेनवर्गमहोदयस्य मतेन ब्रह्मन्शब्दः प्रायशः 'पुरोहित' इति सामान्यार्थे प्रयुक्तोऽस्ति । अस्मिन्संदर्भेऽस्य



न कोऽपि विशेषार्थ आसीत् । अस्य मतेन ब्रह्मन्-शब्दस्य प्रयोगो 'ब्राह्मणाच्छंसी' इति नामकस्य ऋत्विजः कृते एव प्रचलन्नासीत् ।[15]

9. **हविः** - यज्ञेषु हविर्निर्माणं हविर्निर्वापश्च विशिष्टा क्रियास्ति । हविर्निर्माणं देवेभ्यो भवति । यजमानः यज्ञमाध्यमेनैव खाद्यं पेयं च देवेभ्योऽर्पयति । यतः इतः प्रदानाद्धि देवा उपजीवन्ति । अस्त्येतद्धविः देवानां वृद्धीकरणम् । अनेकेषु मन्त्रेषु ब्रह्मशब्दस्य हविरित्यर्थः दर्शनीयः सायणाचार्यभाष्ये । **ब्रह्म हविर्लक्षणमन्नमुद्दिश्य गायत स्तुध्वम्** ।[16] ब्रह्म स्तोत्ररूपं मन्त्रं हविर्लक्षणमन्नं वा ।[17] ब्रह्म हविर्लक्षणमन्नम् ।[18]

10. **प्रजापतिः** - ब्रह्मशब्दस्य उपरिवर्णिताः सर्वेऽर्थाः देवतार्चनसाधनानि सन्ति । परं तु ब्रह्मशब्दस्य प्रयोगो न केवलं साधननिमित्त एवास्ति, अपि तु साध्यरूपायाः देवतायाः कृतेऽपि प्रयुक्तोऽस्ति इत्येवात्र द्रष्टव्यम् । देवतानिमित्तेऽपि प्रयुक्तोऽयं शब्दः प्रजापतयेऽपि दृश्यते । ब्राह्मणकालीनः प्रजापतिः सर्वप्रमुखो देवोऽस्ति । स एवास्य विश्वस्य स्रष्टा । पूर्वं प्रजापतिः एकाकी एवासीत् वाक् च द्वितीयासीत् । स वाचां सृष्टिमकारयत् । अनेकेषु मन्त्रेषु 'ब्रह्मन्' पदस्य प्रजापतिरित्यर्थो दृश्यते ।[19]

11. **ब्रह्म** - संहितायां बहुदेवैकदेववादयोः सम्मिलितावधारणा दृश्यते । एतामेवावधारणां मोक्षमूलर महोदयेन हीनोथीज्म नाम्ना ख्यापितम् । परं तु संहिताकाले येऽमूर्त्तदेवताः आसन् तेषामस्त्येकेश्वरवादित्वम् । वरुणदेवतायां नैतिकैकेश्वरवादः प्रतिष्ठापितोऽस्तीति ग्रीसवोल्डमहोदयस्याभिमतम् ।[20] संहिताकाले उद्भूता सर्वेश्वरवादिमान्यतोपनिषत्काले पराकाष्ठामुपनीता । अत्र तु आत्मा परमात्मा च विचारणीये तत्त्वे आस्ताम् । आत्मा च परमात्मनि संनिहितोऽस्ति । अतः, उपनिषत्काले एकैव सत्तास्ति परमात्मनः । अयमेव ब्रह्म । ब्रह्मैव सत्यं, दृश्यमानं जगत् मिथ्यास्ति । शतपथब्राह्मणे ब्रह्मणः उत्कृष्टता प्रतिपादितास्ति ।[21]

12. **ब्रह्मा** - पौराणिककाले केवलं त्रिदेवस्य प्रतिष्ठा दृश्यते। ते च सन्ति-ब्रह्मा, विष्णुः, महेशः । तेषु ब्रह्मा देवः सृष्टिकर्तास्ति । विष्णुः प्रजापालको महेश्वरश्च संहर्तास्ति । देवविशेषार्थे ब्रह्मशब्दस्य प्रयोगः ऋग्वेदकालादेव प्रतिभाति । अनेकेषु मन्त्रेष्वयं शब्दो देवताविशेषार्थे प्राप्यते । स्वभाष्ये सायणाचार्यः ब्रह्मशब्दस्येममेवार्थं कृतवान् । ब्रह्मा परिवृढो देवः शस्यमानं स्तूयमानमिदम् उप शृणवत् शृणुयात् ।[22]

अत्र ब्रह्मशब्दः ब्रह्माभिधेयामूर्त्तदेवतायाः कृत एवास्ति । तैत्तिरीयब्राह्मणस्य[23] साक्ष्यमस्ति–'ब्रह्म ब्रह्माऽभवत् स्वयम्' । सत्यमिदं यत् ब्राह्मणकालीनं ब्रह्म यस्याभिधानं प्रजापतिरित्यस्ति, स एव परवर्तिकाले स्वयं 'ब्रह्मा' इति रूपेण परिवर्तितोऽभूत् ।[24]

अधुना ब्रह्मशब्दाभिधेयाः पदार्थाः विचारणीयाः । प्रतिभातीदं यत् ब्रह्मन् इत्यस्ति सम्बद्धः सृष्टिकारित्वेन । ब्रह्मशब्दस्यानेकानामर्थानामेकोऽर्थः यज्ञोऽप्यस्ति। यज्ञः प्रतीकोऽस्ति सृष्टिरचनायाः । यज्ञप्रक्रियावर्णनक्रमे प्रायो यथास्थानं स्त्रीपुरुषयोः मैथुनं प्रजननं च वर्णितमस्ति । वेदिनिर्माणमपि स्त्रीतनूपमं भवति । एवमेव वेदिरपि भवति देवानां प्रीत्यर्थाय । अतएव ब्रह्माभिधेयो यज्ञः सृष्टिकारकोऽस्ति । यज्ञसम्बद्धाः मन्त्राः पुरोहिताः हवींषि च सर्वे मिलित्वा यज्ञमुपकुर्वन्ति । परोक्षरूपेण ते सर्वेऽपि सृष्टिप्रक्रियायां सहयोगिनः सन्ति । ब्रह्मशब्दाभिधेयः प्रजापतिः तु सृष्टिकार्यं प्रति यथा सन्नद्धोऽस्ति न तथा कोऽप्यन्यो देवः । स एकाकी एव सृष्टिकर्तास्ति । औपनिषदिकमपि ब्रह्म सृष्टिरूपेण स्वयमात्मानं प्रकटीकरोति । अतः सृष्टिः ब्रह्मसम्बद्धास्ति । एवमेव पौराणिको ब्रह्मापि सृष्टिकार्ये स्वयं नियोजितवानस्ति । अस्य कार्येषु सृष्टिकारित्वं प्रधानम् । वस्तुतः स एवैकाकी सृष्टिकर्ता । व्यतिरिक्तौ द्वौ देवौ विष्णुशङ्करौ इतरकार्ययोः प्रजापालनसंहाराभ्यां सम्बद्धौ स्तः । अतः ब्रह्मशब्दाभिधेयाः ये देवाः सन्ति ते सर्वे यथावसरं देवाधिदेवाः सन्ति तथा च सृष्टिप्रक्रियाविषयेऽपि सम्बद्धाः सन्ति । इत्थं ब्रह्मपदस्य सम्बन्धः सृष्टिकर्तृरूपेऽपि प्रतिपादितोऽस्ति ।

ब्रह्मशब्दस्य निष्पत्तिः बृंह् वर्धने धातोः सम्भवति । अतः ब्रह्मन् वृद्धिसम्बद्धमस्ति । ब्रह्मशब्दाभिधीयमानौ स्तुतिपुरोहितौ वर्धनसम्बद्धौ स्तः । पुरोहितः स्वस्तुतिभिः देवानामुत्साहवर्धनं करोति, स्वाभीप्सितप्राप्तये प्रसन्नतां च नयति । यथालोकं गुरुकार्यं कारयितुं पुरुषविशेषमुत्साहयितुं च येन केनापि प्रकारेण तं प्रीणयन्ति जनाः । एवमेव देवप्रीणनार्थं स्तुतयः सन्ति । शतपथब्राह्मणे आर्षेयानुवचनप्रसङ्गे **'अग्ने महाँ असि ब्राह्मण भारत'** इति प्रशंसावचनस्यायमेवाभिप्रायः । अतः मन्त्रपुरोहितौ देवानामुत्साहवर्धितारौ । देवानां स्तुतिर्यज्ञे भवति । अत एव यज्ञोऽपि ब्रह्म । यज्ञोऽवकाशं ददाति देवानामुत्साहवर्धनाय । यज्ञः स्वयमपि वृद्धिशीलोऽस्ति । ब्राह्मणग्रन्थानां यज्ञस्य वृद्धेः विस्तारस्य वा विषये वारं वारं कथनं लभ्यते । यज्ञस्याधीक्षको ब्रह्मा ऋत्विक्षु प्रधानोऽस्ति, प्रतिष्ठायां,



ज्ञाने, कर्मणि वापि, यतो ब्रह्मा सर्ववित् । करणीयकार्यसम्पादनहेतौ शरीरवृद्धिरपेक्षितास्ति । एतदर्थं भोज्यमपेक्ष्यते । अतः देवानां शारीरिकशक्तिहेतवे यज्ञे हव्यस्य व्यवस्था कारितास्ति । हव्येन देवानां वृद्धिः भवति । अतः हविरपि 'ब्रह्म' इति ।

देवानां ब्रह्मत्वमप्येवमेव वृद्धिसम्बद्धम् । प्रजापतिः सर्वेषु देवेषु सर्वोच्चस्थानं गृहीतवानस्ति । न कोऽप्यन्यो ब्राह्मणकालीनो देवः तथोच्चतामाप्नोत् यथा प्रजापतिः । अतः प्रजापतिः सर्ववृद्धः किं वा सर्वमहानस्ति । औपनिषदिकं ब्रह्म तु एकाकिनी सत्तास्ति । ब्रह्मणो व्यतिरिक्तं नास्ति कोऽपि यथार्थतामुपगता सत्ता । केवलं ब्रह्मैव यथार्थः सर्वमन्यत् प्रतिभासमानम् । अत एवेदमेव ब्रह्म केवलं सर्वोच्चसत्तारूपेण सर्वमहद्रूपेण चास्ति वक्तुमिति शक्यते । पौराणिकोऽपि ब्रह्मा सर्वकार्यदृष्ट्योच्चतरं स्थानं प्राप्तवानस्ति । अस्य कार्ये न कस्यापि सहायतापेक्ष्यते । इत्थं वृद्धिमुपगतो ब्रह्मा ब्रह्मपदेन सर्ववृद्धरूपेण व्यवस्थाप्यते । निष्कृष्टतया वक्तुं पार्यते यत् पूर्वोक्तव्याख्याप्रकल्पतया सर्वेऽपि देवाः ब्रह्मपदाभिधेयतां प्राप्नुवन्ति स्वमहनीयवृत्त्या, स्ववृद्धिरूपात्मकतया च ।

**सन्दर्भसूची :–**

1. ऋग्वेदः, 1.80.1 **इत्था हि सोम इन्मदे ब्रह्मा चकार वर्धनम् ।**
2. तत्रैव 1.64.35,10.107.6,10.125.5. इत्यादि
3. तत्रैव 2.18.7
4. तत्रैव 2.20.5,2.41.18 इत्यादि
5. तत्रैव 1.62.13
6. तत्रैव 1.47.2
7. तत्रैव 1.37.4,2.12.14,2.39.8
8. अथर्ववेदः, 11.3.36,15.1.8
9. ऋग्वेदः 1.10.1,2.39.1,4.58.2
10. तत्रैव 1.108.7
11. तत्रैव 5.40.6,8
12. आल्तिन्दिश्शेस लेबन पृ॰ - 190
13. संस्कृत टैक्स्ट्स 12.251

14. वार्टर बूख ऋ० 2.1.2, 9.96.6
15. तत्रैव 4.50.7,8
16. तत्रैव 1.37.4
17. तत्रैव 1.42.2
18. तत्रैव 1.80.9
19. तत्रैव 1.164.35
20. दि रिलिजन आफ ऋग्वेद पृ० 347
21. शतपथब्राह्मण: 8.4.1.3
22. ऋग्वेदः 4.58.2
23. तैत्तिरीयब्राह्मणः 3.1.29.3
24. वैदिक माइथोलोजी पृ० 119



# सिद्धान्तकौमुद्याः अनुबन्धचतुष्टयविषये वैमत्यम्

डॉ. सौ. भाग्यलता पाटसकर

विषयाधिकारिप्रयोजनसंबन्धाश्च अनुबन्धचतुष्टयम् इति विदितमेव सर्वेषाम् । प्रत्येकं ग्रन्थस्य कृते एते अनुबन्धाः कदाचित् साक्षादुल्लिखिताः कदाचित् सूचिताश्च भवन्ति । तस्य तस्य ग्रन्थस्य व्याख्यातारः टीकाकृतश्च पुनः एतानि अनुबन्धचतुष्टयानि विवृण्वन्ति ।

वैयाकरणसिद्धान्तकौमुद्याः अनुबन्धचतुष्टयं विषयीकृत्य प्रवृत्तमिदं प्रपत्रम् । भट्टोजिना कौमुद्याः अनुबन्धचतुष्टयं कुत्रापि स्पष्टतया नोक्तम्, तथापि कौमुद्याः प्रथमो नमनश्लोको मङ्गलश्लोको वा कोमुद्याः विविरणकर्तृभिः अनुबन्धचतुष्टयत्वेन गृहीतः ।

**मुनित्रयं नमस्कृत्य तदुक्तीः परिभाव्य च ।**
**वैयाकरणसिद्धान्तकौमुदीयं विरच्यते ॥**

सिद्धान्तकौमुद्याः अर्थं प्रकाशयता भट्टोजिना प्रौढमनोरमायामपि अयं श्लोको न व्याख्यातः, तेन तस्य मनसि कौमुद्याः कीदृशमनुबन्धचतुष्टयं वर्तते तन्न ज्ञायते ।

अयं श्लोकोऽनुबन्धचतुष्टयत्वेन इदंप्रथमतया नागेशेन व्याख्यातः लघुशब्देन्दुशेखरे । श्लोकं परिपूर्णं निरूप्य अन्ततोऽनेन वैयाकरणसिद्धान्ताः विषयः, तज्ज्ञानं प्रयोजनम्, तज्जिज्ञासुरधिकारीति स्पष्टं प्रतिपादितम् । अत्र संबन्धविषये न किञ्चिद् वक्ति नागेशभट्टः इति विशेषतः अवधार्यम् । तत्त्वबोधिन्या त्वस्मिन् विषये मौनमेवाश्रितम् । नागेशमनुसृत्य बालमनोरमाकारः तान्येव प्रयोजनानि तथैवानुवदति, अधिक्ये- सम्बन्धेन सह । सिद्धान्त इत्यस्य 'निश्चितार्थ' इति

बालमनोरमाकारेण प्रतिपादितम् । तत्रापि एवमेते शब्दाः साधव इति निश्चितार्थः इति वक्ति तत्रभवान् वासुदेवदीक्षितमहाभागः । पुनरपि वैयाकरणसिद्धान्तकौमुदीति अन्वर्थसंज्ञया वैयाकरणसिद्धान्ताः प्रतिपाद्यत्वेन विषयाः । अनायासेन तदवगमः प्रयोजनम् । तस्य ग्रन्थस्य च जन्यजनकभावः संबन्धः । वैयाकरणसिद्धान्तजिज्ञासु-रधिकारीति ।

सत्याख्यायाः सिद्धान्तकौमुद्याः संपादकानां वासुदेवशास्त्रिणां मतानुसारेण प्रतिपाद्यप्रतिपादकभावः संबन्धः वर्त्तते ।

लघुशब्देन्दुशेखरस्य अन्यतमो व्याख्याकारः दण्डिभट्टः अस्मिन् विषये नागेशेन साकं विरोधं तनोति । अभिनवचन्द्रिकेति व्याख्या तेन व्यरचि । तस्य मतानुसारेण सिद्धान्तकौमुद्याः अनुबन्धचतुष्टयमेवं भवितुमर्हति--वैयाकरणसिद्धान्तज्ञानं विषयः, रक्षोहागमलघ्वसन्देहाः प्रयोजनम्, अधीतकाव्यकोशादिः द्विजातिरधिकारी, संबन्धविषये किमपि नोक्तं दण्डिभट्टेन ।

तर्हि अनुबन्धचतुष्टयस्य त्रितयं त्वत्र विवादास्पदम् । नागेशेन अस्मिन् विषये यदुक्तं तस्य प्रतिवादं युक्त्या कृत्वा स्वमतं स्थापितं तेन । ततोऽनन्तरं न केनापि अस्य पक्षः समादृतो दृश्यते । तथापि वैयाकरणसंप्रदाये शेखरायमाणस्य नागेशस्य मतं सयुक्तिकं खण्डयतस्तस्य मानसं निश्चितमेव नोपेक्षामर्हति । अतः तत्परीक्षितुमुत्सहतेऽयं जनः ।

एवमत्र कौमुद्याः अनुबन्धचतुष्टयविषये यद् वैमत्यं वर्त्तते किं तत्र कारणमित्यस्य समीक्षणात्प्राक् अनुबन्धचतुष्टयविषये किञ्चिद् द्रष्टव्यम् । वेदाङ्गेषु निरुक्ते **'समाम्नायः समाम्नातः'** इत्यनेन यास्काचार्येण विषयोपन्यासः कृतः । तद् यानि पदानि निघण्टौ समाम्नाति तेषां व्याख्यानं निर्वचनं च विषयः । पुनः अथ निर्वचनम् इत्युक्त्वास्यैव विषयस्य पुनः स्थापनं द्वितीये नैघण्टुके करोति । तेन पदनिर्वचनरूपः ग्रन्थोऽयं तस्य रचना सूत्ररूपिणी न कदापि भवितुमर्हति । निर्धारिते विषये अधिकारिनिर्णयः स्वयमेव भवति । निर्वचनं विषय इत्युक्ते तदजानानः, तथापि ज्ञातुमिच्छुः क्षमश्च तस्य ज्ञाने अधिकारी भवति । अत एव यास्कमतानुसारेण अवैयाकरणः न कदापि निर्वचनस्याधिकारी भवितुमर्हति । तदेव यास्काचार्यो वक्ति **नैकपदानि निर्ब्रूयात् । नावैयाकरणाय । नानुपसन्नाय । अनिदंविदे वा । नित्यं हि अविज्ञातुर् विज्ञाने असूया । उपसन्नाय तु निर्ब्रूयात् । यो वालं विज्ञातुं स्यात् । मेधाविने तपस्विने वा । इति ।**



इत्थं पौरुषेयेषु ग्रन्थेषु प्राचीनतमे निरुक्ते विषयाधिकारिरूपो निर्देशो दृश्यते ।

अत्र वैयाकरणसिद्धान्तकौमुदीति नाम्नैव ग्रन्थविषयो ज्ञायते यद् वैयाकरणसिद्धान्ताः इति यदुच्यते तत्र विविदते अभिनवचन्द्रिकाकारः दण्डिभट्टः **चिन्त्यम् इदम्** इति । तन्मतानुसारेण वैयाकरणसिद्धान्तज्ञानं विषयः । हेतुस्तेनात्र प्रदर्शितो यत् प्रवृत्तौ सिद्धान्तज्ञानस्य उद्देश्यत्वम् । यत् प्रवृत्तौ उद्देश्यं तदेव विषयानुरूपे अनुबन्धे उचितं भवति । न केवलं सिद्धान्ताः यथास्थिताः ग्रन्थाध्ययने प्रवृत्तिं जनयन्ति । तेषां ज्ञानं तु ग्रन्थाध्ययने प्रवृत्तौ उपकारकम् इत्यतः सिद्धान्तज्ञानमित्येव ग्रन्थस्य विषयः ।

नागेशभट्टानुसारेण विषयज्ञानं नाम वैयाकारणसिद्धान्तज्ञानं प्रयोजनं वर्तते । अत्रापि मतान्तरं प्रदर्शयति अभिनवचन्द्रिकाकारः--**इदमपि चिन्त्यमिति** उक्त्वा । तन्मतानुसारेण रक्षोहागमलघ्वसन्देहाः इत्यादि भाष्योक्तं प्रयोजनमेवात्र प्रयोजनम् इति वक्तव्यम् । यतो हि नागेशोक्तं वैयाकरणसिद्धान्तज्ञानं कौमुदीकरणस्य प्रयोजनं वर्तते । अत्र तु ग्रन्थविषयस्य नाम सिद्धान्तज्ञानस्य प्रयोजनमपेक्षितम् । सिद्धान्तज्ञानस्य यत् किमपि प्रयोजनं वर्तते तदजानानः कोऽपि तदध्ययने न प्रवर्तेत । अनुबन्ध-चतुष्टयस्य ज्ञानमेव अध्ययनप्रवृत्तौ प्रयोजकं वर्तते । दण्डिभट्टस्य मतानुसारेण वैयाकरणसिद्धान्तानां ज्ञानं ग्रन्थकारस्य बुद्धौ वर्तते । तेन अध्येतुः तदध्ययने प्रवृत्तिः कथं भवेत् ? अतः तथा प्रयोजनं भवतु येन अध्येता तत्र प्रवर्तेत । ततु रक्षोहागमलघ्वसन्देहा एव भवितुमर्हन्ति इति ।

तज्जिज्ञासुर्नाम वैयाकरणसिद्धान्तजिज्ञासुः अधिकारीत्यत्रापि वैमत्यं धारयति व्याख्याकारोऽयम् **इदमपि चिन्त्यमित्युक्त्वा** । तन्मतानुसारेण तज्जिज्ञासा-याश्चाण्डालादेरपि संभवात्, तस्यापि अधिकारित्वापत्तेः तस्मात् अधीतकाव्यकोशा-दिर्द्विजातिरधिकारीति वक्तव्यम् ।

प्रथमं तावदिदं द्रष्टव्यं यत्केन विचारेण नागेशस्य मतानि अनेन व्याख्याकारेण अपास्तानि, कीदृशं वा न्यूनत्वं तेनात्रावबुद्धमिति । दण्डिभट्टस्य मतानुसारेण ग्रन्थाध्ययनविषयकप्रवृत्तिप्रयोजकज्ञानविषयत्वं चानुबन्धसामान्यलक्षणम् । प्रत्येकमनु-बन्धेन ज्ञानविषयेण भवितव्यम्, अनेन ज्ञानेन ग्रन्थाध्ययने प्रवृत्तिकारकेण भाव्यम् । एवं ज्ञाता एवानुबन्धाः ग्रन्थाध्ययने प्रेरकतां जनयन्ति । तन्मतानुसारेण यथास्थितः ग्रन्थविषयः नानुबन्धो भवितुमर्हति । यदाऽध्येता तद्विषयं जानाति तदैव स ग्रन्थाध्ययनं प्रति प्रेरितो भवति, इयमेव कथा प्रयोजनाधिकारिणोः । एवमनुबन्धाः

ग्रन्थाध्ययने प्रेरकाः, ज्ञातमात्रे एव ते प्रेरयन्ति । अतः ते अध्येतृनिष्ठाः इति तस्य मतं संग्रहेण वक्तुं शक्यते ।

एतन्मतानुसारेण अनुबन्धा ज्ञानविषयीभूता भवन्तु इत्यत्र का युक्तिरिति द्रष्टव्यम् ।

प्रवृत्तिमात्रं प्रति बलवदनिष्टाननुबन्धीष्टसाधनत्वप्रकारं कृतिसाध्यत्वप्रकारं ज्ञानं करणम् । यदा कश्चन पुरुषः "अनेन ज्ञानमात्रेण ममानिष्टं परिहरेत् इष्टं च साधयेत् अपि च ज्ञानमिदं प्रयतनेनैव साध्यम्" इति जानाति तदैव तस्य तज्ज्ञानमधिगन्तुं प्रवृत्तिर्भवति अतः तज्ज्ञानोत्पत्त्यर्थं ग्रन्थादौ यत्नः कर्तव्यः । बलवदनिष्टाननुबन्धीष्ट-साधनत्वप्रकारं ज्ञानं तथा च कृतिसाध्यत्वप्रकारं ज्ञानं कथमुत्पद्यते इति चेत् अनुबन्धचतुष्टयस्य ज्ञानेन इति मन्यते अभिनवचन्द्रिकाकारः । तदित्थं विषयज्ञानात् इष्टसाधनत्वप्रकारकं कृतिसाध्यत्वप्रकारकं चेति ज्ञानद्वयं जायते । विशिष्टबुद्धौ विशेष्यतावच्छेदकधर्मप्रकारकनिश्चयस्य कारणत्वात् । तार्किकशैल्या प्रतिपादितेयं युक्तिः सरलतयावबोधने इत्थं यत्नः कर्तव्यः ।

इष्टसाधनं विषयज्ञानम्, नीलो घट इतिवत् अत्र विशेष्यविशेषणभावः । अस्मिन्नुदाहरणे नीले विशेषणे या बुद्धिरुत्पन्ना सा विशिष्टबुद्धिः एवमेव इष्टसाधने या बुद्धिरुत्पन्ना साऽपि विशिष्टबुद्धिः । तस्याः उत्पत्तौ किं कारणम् ? इति चेत् विशेष्यो यो घटः, तस्य भावो घटत्वं तस्यावच्छेदको घटस्तस्य धर्मः घटत्वं, तस्य च प्रकारः नीलगुणः तस्य निश्चय एव विशिष्टबुद्धौ कारणम् । एवमेव विषयज्ञानस्य निश्चय एव तस्य इष्टसाधनबुद्धौ कारणम् । अतएव विषयज्ञानम् अनुबन्धत्वेन स्वीकृतम् । विषयज्ञानेन विषयस्येष्टसाधनत्वे बुद्धिर्निश्चयो भवति तेनाध्येतुर्ग्रन्थाध्ययने प्रवृत्तिर्जायते इत्यत्राभिप्रायः ।

पुनरयं वक्ति अधिकारिज्ञानेन च कृतिसाध्यत्वप्रकारकं ज्ञानं जायते । कीदृशः पुरुषोधिकारी भवतु इति यदा ज्ञायते तदा कथंविधेन प्रयत्नेन साधनीयमिदमित्यवबोधो जायते इत्यभिप्रैति अयमत्र ।

प्रयोजनज्ञानस्यानुबन्धत्वं स्पष्टीकुर्वन् अयं 'प्रयोजनज्ञानेन चेष्ट-साधनत्वप्रकारकं ज्ञानं जायते' इति वक्ति तस्यावगमे विशेषो यत्नो विधेयः । एकं तावत् विषयज्ञानविषयेऽपि तेनेदमेवोक्तम् । पुनरत्रापि इदमेव वचनमिति दुष्टं भाति, तथापि केन विचारेणैवमुक्तमिति द्रष्टव्यम् । तदत्रोदाह्रियते-काव्यस्य प्रयोजनं सद्यः परनिर्वृतिरिति । यदा अस्य प्रयोजनस्य ज्ञानं भवति अपि च सैव यदेष्टत्वेन



अपेक्ष्यते, तदा सद्यःपरनिर्वृतिं प्रति काव्यमेव साधनं नान्यत् किञ्चित् इत्येतादृशोऽवबोधो जायते ।

संबन्धज्ञानेन चोभयज्ञानं जायते इत्यस्मिन् वाक्ये कयोः उभयोः संबन्धः इति च स्फुटीभवति विषयाधिकारिणोर्वा विषयप्रयोजनयोर्वा इति ।

अन्ततः व्याख्याकारः उपसंहरति 'इति अनुबन्धचतुष्टयनिरूपणमवश्यं कर्त्तव्यम्' इति नागेशेनानुबन्धचतुष्टयं निरूपितमनेन वैयाकरणसिद्धान्ता विषया इति ।

अद्यावधि अस्माभिः अभिनवचन्द्रिकाकारेण वैयाकरणसिद्धान्तकौमुद्याः अनुबन्धविषये यदभिनवत्वेन प्रतिपादितं तत्र को हेतुः का वावधारणा इत्येव तस्य हृदयं ज्ञातुं यत्नो विहितः । अधुना तस्य समीक्षा प्रारभ्यते-

१. अनुबन्धचतुष्टयस्य ज्ञानमध्येतुरपेक्ष्यते, अनुबन्धचतुष्टयं ज्ञानविषयी-भूतमिति तस्य गृहीतं चिन्त्यम् । अपि च तज्ज्ञानं ग्रन्थाध्ययने प्रेरकं भवतु इति यदुक्तं तदन्योन्याश्रयि अतः अस्वीकार्यम् । ग्रन्थस्य विषयः प्रागेव ज्ञायते चेत्, ग्रन्थाध्ययने पुरुषः किमर्थं प्रवर्तेत ?

२. अनुबन्धचतुष्टयस्य ज्ञानविषयीभूतत्वं कथयता अनेन प्रयोजनविषये तु रक्षोहादीनां यथाभाष्यं प्रयोजनत्वं कथितम् । तन्मतानुसारेण रक्षोहागमादीनां ज्ञानमध्येतारं ग्रन्थाध्ययनं प्रति प्रयोजयति । तथापि सिद्धान्तकौमुदीति ग्रन्थः साक्षात् वेदरक्षार्थं नोपयोगि अपि च इमानि निखिलस्य व्याकरणाध्ययनस्य प्रयोजनानि न तु व्याकरणसंप्रदाये वर्तमानस्य कस्यचित् ग्रन्थस्य ।

३. अधिकारिज्ञानेन कृतिसाध्यत्वप्रकारकं ज्ञानं जायते इति निरूपयन्नयमधीतकाव्यकोशादिर्द्विजातिरधिकारीति निर्धारयति । एतादृशस्य द्विजातेर्ज्ञानेन कृतिसाध्यत्वप्रकारकं ज्ञानं कथं जायेत, जाते सति कथं तत् ग्रन्थाध्ययनेऽध्येतारं प्रचोदयेत् इति न स्फुटीभवति अत्र । अपि च अधीतकाव्यकोशादेः एव किमर्थं कौमुदीपाठे प्रवृत्तिः ? अपि च किमर्थं तस्य कौमुदीपाठे एव प्रवृत्तिः ? अद्यतनीये काले कदाचित् कौमुदीमपहाय Primer, Manual पठित्वा रघुकिरातादीनामध्ययनं सुशकम्, तथापि सार्धशतकात् प्राक् कौमुदीं विना संस्कृतभाषाध्ययनं स्वप्नेऽपि न शक्यम् । अपि च द्विजातिरेव ग्रन्थस्याधिकारी भवितुमर्हति इत्ययं विचारः तत्कालानुरूपः स्यान्नाम अद्यतनीये काले तु सर्वथैव अस्वीकार्यः ।

४. अधुना अनुबन्धचतुष्टयस्य विषये मूलतो विचारः कर्तव्यः । किमर्थमयं विचारः प्रसृतः ? इदमनुबन्धचतुष्टयं ग्रन्थकारलक्षि अथवा ग्रन्थाध्येतृलक्षि नाम अनुबन्धचतुष्टयं ग्रन्थकारं ग्रन्थरचनायाम् उपकरोति अथवा अध्येतारं तस्मिन् ग्रन्थपाठे प्रेरयति इति मूलगामी प्रश्नः ।

मन्मतानुसारेणेदमनुबन्धचतुष्टयं ग्रन्थकारलक्षि भवितुमर्हति । तस्य निर्धारणं ग्रन्थस्य रचनायां परिणामं साधयति । अत्र ग्रन्थस्य विषयः तस्य विषयानुक्रमात् भिन्नो वर्त्तते । ग्रन्थस्य विषयानुक्रमो नाम तस्य वस्तु । विषयो नाम यस्मिन् विशालतरे संकाये तदन्तर्भूतो भवति सः । ग्रन्थालये Colon Classification पद्धत्या R.P.Q.अथवा प.क.र इत्यादृशैः वर्णैः निर्दिष्टः विषयः अनुबन्धचतुष्टये 'विषय' इत्यनेन शब्देनाभिप्रेतः । तदत्रोदाह्रियते वाक्यपदीयस्य ग्रन्थस्य विषयानुक्रमे ब्रह्मकाण्डं, पदकाण्डं, विविधाः समुद्देशाः इत्यादीनां नामानि प्राप्यन्ते, तथापि अस्य ग्रन्थस्य अनुबन्धभूतो विषयः व्याकरणदर्शनम् इति भवेत् । कस्मिँश्चित् ग्रन्थे समग्रस्य व्याकरणदर्शनस्य केषांचन बिन्दूनाम् आंशिकी चर्चा स्यान्नाम, तं ग्रन्थं रिरचयिषुः ग्रन्थकारस्तु समग्रं व्याकरणदर्शनं जानातु इति अभिप्रायः विषयः इति अनुबन्धस्य ।

प्राचीनैः एतादृशः विषयोपन्यासः प्रथमतया कृतो दृश्यते–**अथातो ब्रह्मजिज्ञासा, अथातो धर्मजिज्ञासा, अथ शब्दानुशासनम् । समाम्नायः समाम्नातः स व्याख्यातव्यः । अथ शिक्षां प्रवक्ष्यामि । ततो जयमुदीरयेत्** । प्रारीप्सितः ग्रन्थः कस्मिन् दर्शने वा शास्त्रे वा आपतति तस्यायं निर्देशः ।

अधिकारीत्ययमनुबन्धोऽपि ग्रन्थकारलक्षी । कस्य कृतेऽयं ग्रन्थो विरच्यते इति निर्धारितं चेत् तदनुसृत्य विषयविभागः, लेखनशैली, उदाहरणानि, दृष्टान्त-दार्ष्टान्तिकं, बिन्दुपल्लवनं कर्तुं शक्यते । आचार्याणां ब्रह्मसूत्रभाष्यं तथा च सदाशिवस्य वेदान्तसारः उभावपि समानविषयभाजौ नाम अद्वैतप्रतिपादकौ तथापि अधिकारिभेदात् वैविध्यं तत्र दृश्यते । एवमेव पाणिनिसूत्राणि कातन्त्रव्याकरणमुभावपि ग्रन्थौ व्याकरणविषयौ सूत्रात्मकौ, तथापि तत्र रचनाभेदः प्रणयनभेदो वा दृश्यते अधिकारिभेदात् । वाक्यपदीयं परमलघुमञ्जूषा उभौ अपि व्याकरणदर्शनं विषयीकुरुतः तथापि अधिकारिभेदात् प्रतिपादनसरण्यां विशेषो दृश्यते । अतः ग्रन्थस्याधिकारी अवश्यमेव प्रागवधेयो ग्रन्थकारेण ।

संबन्ध इति योऽनुबन्धो वर्तते स प्रतिपाद्यनिरूपणाय दिशां ददाति ।



व्याकरणदर्शनमिति विषयः मनसि निर्धारितश्चेत् प्रतिपाद्यं तथा स्थापनीयं येन व्याकरणदर्शनविषयकः सिद्धान्तः पाठकानां मनसि प्रस्फुरेत् । प्रक्रिया इत्येतावति विषये निर्धारिते यत्किञ्चन वस्तु ग्रन्थस्य तत् प्रक्रियाप्रतिपादनपरं भवतु इत्यतः विषयस्य रच्यमानस्य ग्रन्थस्य प्रतिपाद्य-प्रतिपादकपरः संबन्धः स ग्रन्थस्य समाप्तिं यावत् ग्रन्थकारेण ध्येयः ।

बालमनोरमाकारेण जन्यजनकभावः संबन्धः प्रतिपादितः । तन्मतानुसारेण ग्रन्थप्रयोजनयोर्मध्येऽयं संबन्धः । ग्रन्थस्य विषयः वैयाकरणसिद्धान्ताः तस्य च प्रयोजनं तज्ज्ञानं भवति चेत् ग्रन्थेन तज्ज्ञानं जायते इत्यतः ग्रन्थप्रयोजनयोर्मध्ये जन्यजनकभावः संबन्धः इत्यस्याभिप्रायो दृश्यते ।

मन्मतानुसारेण ग्रन्थाध्ययनेन तादृशं प्रयोजनम् अध्येतुर्मनसि फलितं भवति वा न इति न ग्रन्थकारस्य वशम्, अध्येत्रपेक्षि तत् । अनुबन्धचतुष्टयं तु ग्रन्थकारनिष्ठं वर्तते अतः जन्यजनकरूपः संबन्धः अस्वीकार्यः।

प्रयोजनमिति अनुबन्धविषयेऽपि विशेषो विचारो विधेयः । प्रयोजनं ग्रन्थस्य भवति वा ग्रन्थविषयस्य ? उभयोरिति मे मतिः । **रक्षोहागमलघ्वसन्देहाः प्रयोजनमिति** यानि भाष्योक्तानि प्रयोजनानि तानि ग्रन्थविषयस्य नाम व्याकरणाध्ययनस्य । वेदार्थज्ञानमिति प्रयोजनं निरुक्तस्य । तर्हि यद्विषयस्य प्रयोजनं भवति, तदेव ग्रन्थ-वस्तुनोऽपि भवतु, प्रयोजननिश्चयेन विषयग्रन्थयोः प्रतिपाद्यप्रतिपादकरूपः संबन्धो दृढीभवति । निर्धारिते प्रयोजने तल्लिप्सु-रधिकारीत्यापतति इत्यभिप्रायेण एव **इत्येवं विषयप्रयोजनयोरुक्तयोः संबन्धाधि-कारिणौ उक्तप्रायौ एव इति पृथङ् नोक्तौ** ।" इति वक्ति शब्दकौस्तुभे भट्टोजिदीक्षितः ।

तथापि अधिकारिणमनुलक्ष्य प्रयोजने किञ्चित् अंशमात्रं वा परिवर्तनमपेक्ष्यते । संस्कृतभाषाया वा व्याकरणस्य विषये किञ्चिदपि अजानानः वैदेशिको यदि कस्यापि व्याकरणग्रन्थस्याधिकारित्वेन निर्धार्यते तदा वेदरक्षा वा ऊहो वा इति प्रयोजनानुसारिणी कृतिः अशक्या । व्याकरणस्य सुलभावगमः इति तस्य ग्रन्थस्य मुख्यं प्रयोजनं, ग्रन्थवस्तु तथा प्रतिपादनीयम् । तथापि तत् प्रयोजनं परमप्रयोजनोपकारि भवतु इत्यत्र दक्षतामपेक्षयते ग्रन्थकारस्य प्रयोजनमिति अनुबन्धविचारद्वारा ।

एवमनुबन्धचतुष्टयं ग्रन्थकारेण मनसि निधेयम्, येन ग्रन्थस्य वस्तु तेनैव विशिष्टरूपेण अनुबध्यते, रचनाविशेषमापादयति । तस्मिन् चतुष्टयेऽपि आन्तरः

संबन्धो दृश्यते, विषयनिश्चयेन प्रयोजननिश्चयो भवति, तेनैव ग्रन्थस्य प्रतिपाद्यप्रतिपादकरूपः संबन्धो दृढीभवति, ग्रन्थस्य प्रतिपादकत्वं कीदृशस्याधिकारिणः कृते इत्यपि तदनन्तरं स्फुटं भवति ।

विषयाधिकारिसंबन्धप्रयोजनानां ग्रन्थवस्तुनः रचनाबन्धे उपकारित्वात् अपि च अन्तः अनन्वितत्वात् तत्रानुबन्धशब्दः सार्थक्यं भजते ।

अथ सिद्धान्तकौमुद्याः अनुबन्धचतुष्टयम्–वेयाकरणसिद्धान्ताः विषयः इति यन्नागेशभट्टेन उक्तं तत् समञ्जसम् । यतो हि प्रक्रियाविषयकाः केचन सिद्धान्ताः असिद्धं बहिरङ्गमन्तरङ्गे, स्थानिवद्भावः, अपवादस्य बलीयस्त्वम्, वार्णदाङ्गं बलीयः इत्यादयः तेषां सोदाहरणमुपयोजनं कृतं दृश्यते । पदविषयकाः, प्रक्रियाविषयकाः सन्तोऽपि एते सिद्धान्ताः शब्दनित्यत्वरूपेण वैयाकरणानां परमसिद्धान्तेन न विरुध्यन्ते इत्यत्र दक्षोऽयं ग्रन्थकारः । तज्ज्ञायते स्थानं च प्रसङ्गः । दर्भाणां स्थाने शरैः प्रस्तरितव्यम् इत्यादिना वाक्येन । अत एव ग्रन्थस्य प्रतिपाद्यप्रतिपादकरूपः संबन्धः यद्यपि नागेशेन नोक्तः, संगच्छते । वैयाकरणानां प्रक्रियासिद्धान्तानां ज्ञानमिति अपि समीचीनम् । यतो हि तत्प्रयोजनमनुसृत्यैव सूत्राणां पुना रचना कृता दृश्यते । सूत्राणामर्थज्ञानम् इत्येतादृशं प्रयोजनं शब्दकौस्तुभे स्पष्टं दृश्यते कोमुद्यास्तु प्रक्रियासिद्धान्तज्ञानमित्येव प्रयोजनम् । एतेषां प्रक्रियासिद्धान्तानां ज्ञानम् जिज्ञासुमधिकारिणं प्रति भवतु इत्यतः प्रक्रियाविषये एवात्र विशेषतः पल्लवितो दृश्यते ।

तदत्र संगृह्यते

१. अनुबन्धचतुष्टयं ग्रन्थस्याध्येतारं ग्रन्थाध्ययनं प्रति प्रेरयति अतः तद् ज्ञानविषयीभूतम् इति या अवधारणा दृश्यते अभिनवचन्द्रिकाकारस्य सा न समीचीना।

२. तामेव धारणामनुसृत्य तेन सिद्धान्तकौमुद्याः अनुबन्धचतुष्टयं परीक्षितम् अपि च चिन्त्यमिदम् इत्युक्त्वा तत् प्रत्येकं खण्डितम् ।

३. मन्मतानुसारेण अनुबन्धचतुष्टयस्य विचारः ग्रन्थकर्तुः कृते भवति । ग्रन्थवस्तु सम्यक्तया विरचयितुमुपस्थापयितुं वा तमुपकरोति दिशश्च च आदिशति ।

४. तदनुसारेण नागेशभट्टेन कृता अनुबन्धचर्चा समीचीना ।



# शाकुन्तलस्य चतुर्थाङ्के कारुण्यम्

वकील प्रसाद यादवः

काव्येषु व्यङ्ग्यभूतो रसः बहुभिः रूपैः सहृदयैरास्वाद्यते । अपरन्तु, कस्यचिदेकस्य रसस्य अङ्गित्वमङ्गीक्रियते लक्षणग्रन्थकारैः ।[1] प्रायशः शृङ्गार–वीर–शान्तानामङ्गित्वं बहुधा लक्ष्यते तथापि करुणरसस्यापि न्यूनता न वर्तते । वस्तुतः सामान्यानां हृदि स्थायित्वेन विद्यमानः शोकः दाहादिभिः उद्दीपनैः उद्दीपितः देवनिन्दाभूपाताद्यनुभावैः पुष्टः निर्वेदमोहादिभिः व्यभिचारिभावैः संवलितो यदाऽऽस्वाद्यते, तदैव करुणरसस्योद्रेकः ।[2] वाल्मीकिना विरचितस्य आदिकाव्यस्य रामायणस्य मूलस्वरः करुण एव । यतः 'क्रौञ्चद्वन्द्ववियोगोत्थः शोकः श्लोकत्वमागतः ।'[3] न केवलमित्थमपितु नाट्यकारेण भवभूतिना करुणस्य प्राधान्यमेव उपस्थापितम्–'एको रसः करुण एव निमित्तभेदात् ।'[4] कालिदासस्य काव्येष्वपि करुणरसस्य अजस्रप्रवाहो दरीदृश्यते, यस्य भाषानर्तकी भावानवलम्ब्य नरीनर्त्ति । अतो वयं विनिश्चेतुं शक्नुमः यत् अभिज्ञानशाकुन्तलस्य चतुर्थाङ्के आऽङ्कसमाप्ति करुणरसः वरीवर्त्ति ।

करुणरसः नैराश्यमयात् निरपेक्षः रसोऽस्तीति काव्यशास्त्रिणः । भवभूतिः 'तटस्थं नैराश्यमयात्'[5] इत्युक्त्वा करुणरसस्य निराशात्मकं रूपमदर्शि । कालिदासस्य शृङ्गारे कारुण्यं तथा च कारुण्ये नैराश्यं युगपद्रूपेण प्रतिपादितमस्ति । शाकुन्तलस्य चतुर्थाङ्कस्य तु प्रायशः सर्वाणि दृश्यानि मनोहराणि सन्ति, यतः अङ्केऽस्मिन् करुणविप्रलम्भभावस्य चित्रणं विहितमस्ति । राज्ञः दुष्यन्तस्य कण्वाश्रमे प्रवेशः सुखाय प्रवर्तते । तत्र शकुन्तलया सह प्रेमालापः गान्धर्वविवाहस्य च प्रस्तावोऽपि मोदाय एव, किन्तु दुर्वाससः शापः तदनु शकुन्तलायाः पतिगृहगमनम्, तेन विषण्णाः वन्यप्राणिनः, गुरोरुद्बोधनम्, सख्योः (प्रियंवदानसूययोः) विलापः,

प्रत्याख्यानानन्तरं शकुन्तलायाश्च करुणक्रन्दनं सुतरां कारुण्यप्रदमेव ।

अभिज्ञानशाकुन्तले मानवमनोगतयोः आघातप्रतिघातयोः वर्णने कवेः कल्पनायाः कमनीयता नितरां श्लाघ्या । उपर्युक्तानि करुणविषयकाणि तथ्यानि द्विधा विभाजयितुं शक्यन्ते । तद्यथा –

(क) शकुन्तलायाः पतिगृहगमनम्

(ख) राज्ञा दुष्यन्तेन अनभिज्ञातायाः शकुनालायाः मनःस्थितिश्च । 'किन्त्वद्यैव शकुन्तला नीयते' इत्यनसूयायाः वचनेन करुणविप्रलम्भः आरभ्यते । प्रसङ्गेऽस्मिन् गुरोः काश्यपस्य इयमुक्तिः द्रष्टव्या–

**यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया**
**कण्ठः स्तम्भितवाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम् ।**
**वैक्लव्यं मम तावदीदृशमपि स्नेहादरण्यौकसः**
**पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः ॥**[6]

आशयोऽयं वर्तते यत् लौकिके गृहस्थे जीवने वा करुणोत्पादिकाः काश्चन घटनाः बहुशः दृश्यन्ते, यथा–पुत्र्याः पुत्रस्य वा विच्छेदे मातुः पितुर्वा मनःस्थितिः । तथैव पत्युर्विरहे पत्न्याः, पत्न्याः विरहे पत्युः इत्यादीनां मनःस्थितिः । शकुन्तला अद्य पतिगृहं गमिष्यतीति उक्त्वा कण्वः रुद्धकण्ठः सन् शोकमनुभवति । नवैः तनयाविश्लेषदुःखैः गृहिणः सर्वदा पीड्यन्ते । आश्रमेष्वपि एतादृश्यः ग्राम्यघटनाः दृष्टिगोचराः भवन्तीति कवेः वैशिष्ट्यम्, पतिगृहं गन्तुमुद्यतां शकुन्तलां दृष्ट्वा भृशं खेदमावहन्ति वन्यप्राणिनः । कुत्रचित् उद्गलितदर्भकवलाः मृग्यः तु क्वापि परित्यक्तनर्तना मयूराः । अपि च लताः पाण्डुपत्राण्यपसृत्य अश्रूणि पातयन्ति । अत्र ज्ञातिजनस्निग्धाभिः वनलताभिः प्रदर्शिताः चेष्टाः मर्मस्पर्शिन्य एव ।[7] कदाचित् कण्वेन तरवः इत्थं प्रार्थिताः–हे तपोवनतरवः, युष्मासु अकृतजलसेकेषु या शकुन्तला पूर्वं जलं ग्रहीतुं न यतते, भवतां प्रेम्णा प्रियालङ्कारापि किसलयं नादत्ते एवञ्च युष्माकं प्रथमे पुष्पप्रसूतिकाले उत्सवमाचरति सैव शकुन्तला अद्य पतिगृहं गच्छति । अतः भवद्भिः तपोवनतरुभिः गमनमनुमन्यताम् ।[8] प्रकृत्या सह मानवमनोभावानां सहजवर्णने कवेः क्लान्तिर्नास्ति । वाष्पं मुञ्चन्त्यौ सख्यौ काश्यपो जगाद–**अनसूये, अलं रुदित्वा । ननु भवतीभ्यामेव स्थिरीकर्तव्या शकुन्तला** ।[9] तच्छ्रुत्वा



अनसूया प्रियंवदा च इतोऽपि विह्वले साश्रुनयने च बभुवतुः । शकुन्तलायाः का कथा ? सा तु तातविरहेण मलयतटोन्मूलिता चन्दनलतेव ।

कारुण्यमपगतं न्यूनं वा भवेदित्यतः गुरोः श्रेष्ठजनानां वा सान्त्वनावचनमपि तत्र तत्र शुश्रूयते । काश्यपः दार्ढ्येन वदति – **'मम विरहजां न त्वं वत्से शुचं गणयिष्यसि'** ।[10] किन्तु शकुन्तलायाः वचनेन एकवारं पुनः कारुण्यं प्रस्फुटति ।[11] तदा तु गुरुः काश्यपः तस्याः प्रत्यावर्तनवचनम् उक्त्वा शकुन्तलां बोधयति । नान्यः उपायः ऋते साश्रुनयनाभ्याम् । वस्तुतः काश्यपः न केवलम् अन्यान् बोधयति आत्मानमपि प्रबोधयति । अतएव तस्य मनसि नास्त्यनिष्टापत्तिः अपरन्तु सः शकुन्तलां पतिगृहं सम्प्रेष्य प्रसन्नोऽभवत्–

**अर्थो हि कन्या परकीय एव**
**तामद्य सम्प्रेष्य परिग्रहीतुः ।**
**जातो ममायं विशदः प्रकामं**
**प्रत्यर्पितन्यास इवान्तरात्मा ॥**[12]

प्रत्याख्यानानन्तरं पञ्चमाङ्के हार्दं कष्टमनुभवन्ती शकुन्तला विललाप । वक्त्रं चकर्त एवञ्च जगाद–**'बसुधे ! देहि मे विवरम् ।'**[13] इह सर्वाङ्गतः विप्रलब्धा शकुन्तला असहाया करुणपरिदेविनी चास्ति । मूलतः प्रकृतेः शाश्वतोऽयं नियमः यत् अनिष्टाभावेन इष्टविनाशस्याभावः । दुष्यन्तस्याभावेन शकुन्तलागतः कारुण्याभावः। पितुरभावेन पुत्र्याः विच्छेदशोकाभावः । किन्तु जगन्नियन्तुः नियमाः मानवैः नियन्त्रिताः न भवन्ति । लोकाचारे काव्ये वा उक्ततथ्यं खलु प्रमाणीभवति । कस्यचित् दुर्वाससः शापः तादृशः कष्टकरः भविष्यति येन शकुन्तलाख्या काचित् मुग्धा वामा पत्या प्रतयाख्यास्यते । समासतः कालिदासस्य कृतिषु विलासस्य यद्यपि प्राधान्यं तथापि वेदनायाः यद्रूपं शाकुन्तले दृष्टिगतं भवति तेन वक्तुं शक्नुमः यत् महाकविकालिदासः मानवीयमनोभावानाम् अभिव्यक्तये सिद्धहस्तः इति दिक्।

सन्दर्भसूची

1. नाट्यशास्त्रम् 7/120

ध्वन्यालोकः, 3/21, 'एको रसोऽङ्गीकर्त्तव्यस्तेषामुत्कर्षमिच्छता॥'

2. साहित्यदर्पणः, तृतीयपरिच्छेदः, 222-25
3. ध्वन्यालोकः, प्रथमोद्द्योतः
4. उत्तररामचरितम्, 3/47
5. उत्तररामचरितम्, 3/13
6. अभिज्ञानशाकुन्तलम्, 4/6
7. अभिज्ञानशाकुन्तलम्, 4/12
8. अभिज्ञानशाकुन्तलम्, 4/9
9. अभिज्ञानशाकुन्तलम्, पृ०235
10. अभिज्ञानशाकुन्तलम्, 4/19
11. अभिज्ञानशाकुन्तलम्, पृ०251,'तात,कदा नु भूयस्तपोवनं प्रेक्षिष्ये।'
12. अभिज्ञानशाकुन्तलम्, 4/22
13. अभिज्ञानशाकुन्तलम्, पृ० 327




# भारतं पञ्चमो वेदः


डॉ० विजय कुमारः


महाभारतस्य प्राचीनं नाम भारतं वर्तते । भारतं पञ्चमो वेदः मन्यते । कथनस्य तात्पर्यमिदमस्ति यत् महाभारतं पञ्चमो वेदः मन्यते । इतिहासपुराणात्मके साहित्ये महाभारतस्य स्थानं महत्त्वपूर्णम् अस्ति । विशालपरिमाणकस्य विश्वकोषस्य रूपेण महाभारतस्य यद् वैशिष्ट्यं विद्यते तत् इतिहासपुराणात्मके साहित्ये कुत्रापि न समुपलभ्यते ।

महाभारतस्य प्रशंसायां महर्षिः व्यासः अभणत् -

**इतिहासोत्तमादस्माज्जायते कवि-बुद्धयः ।**
**पञ्चभ्य इव भूतेभ्यो लोकसंविधयस्त्रयः ॥**
**इदं कविवरैः सर्वैराख्यानमुपजीव्यते ।**
**उदयप्रेप्सुभिर्भृत्यैरभिजात इवेश्वरः ॥**

महाभारतस्य पात्रेषु एका विचित्रता सजीवता सम्पूरिता वर्तते । सर्वाणि पात्राणि विलक्षणानि वर्तन्ते, परन्तु धर्मराजे या धार्मिकता दृश्यते तत् एकम् अद्भुतं वस्तु वर्तते । महाभारतं धर्मशास्त्ररूपेण गृहीतमस्ति । वस्तुतः तत् वर्तते अपि धर्मस्यैव प्रतिपादकः ग्रन्थः । महर्षिः व्यासः स्वकीयं सन्देशं मनुष्येभ्यः मनोहरेषु श्लोकेषु निबद्धं कृतवान् अस्ति ।

दृश्यतां श्लोकोऽयम् -

**ऊर्ध्वबाहुर्विरौम्येष न च कश्चित् शृणोति मे ।**
**धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते ॥**

यदि मनुष्यः सत्सुखस्य अभिलाषी अस्ति तर्हि तस्य परमं कर्तव्यं धर्मस्य सेवनमेवास्ति ।

महर्षि: व्यास: भारतीयार्थनीते:, राजनीते: तथा अध्यात्मशास्त्रस्य सिद्धान्तानां सारांशम् ईदृश्या सुन्दर्या शैल्या ग्रन्थरत्नेऽस्मिन् प्रस्तुतवान् अस्ति यत् ग्रन्थोऽयं सत्यं भारतस्य धर्मस्य तथा तत्त्वज्ञानस्य विश्वकोषोऽस्ति । धर्म एव भारतीयसंस्कृते: प्राणा: । महर्षे: व्यासस्य स्पष्टा उक्ति: वर्तते यत् धर्मस्य परित्याग: कस्यामपि दशायां भयेन अथवा लोभेन न कर्तव्य: । धर्म: शाश्वत: विद्यते, चिरस्थायी वर्तते–

**न जातु कामान्न भयान्न लोभाद्**
**धर्मं त्यजेज्जीवितस्यापि हेतो: ।**
**धर्मो नित्य: सुखदु:खे त्वनित्ये**
**जीवो नित्यो हेतुरस्य त्वनित्य: ॥**

महर्षि: व्यास: कर्मवादी आचार्य: वर्तते । कर्म एव मनुष्यस्य सुस्थिरं लक्षणं विद्यते, कर्मण: पराङ्मुख: मानव: मानवस्य पदव्या: सदा वञ्चितो भवति।

दृश्यताम् अत्र –

**प्रकाशलक्षणा देवा मनुष्या: कर्मलक्षणा: ।**

अत एव इयं भव्या भारतभूमि: कर्मभूमि: वर्तते । फलभोगस्य स्थानं तु स्वर्ग: विद्यते य: अस्या: भूमे: परित्यागस्यानन्तरं प्राप्यते । अस्मिन् विशाले ब्रह्माण्डे मनुष्य एव श्रेष्ठं वस्तु विद्यते यस्य कल्याणाय पदार्थानां सृष्टि: भवति तथा च समाजस्य व्यवस्था क्रियते । अद्यतनानां समाजशास्त्रिणां सिद्धान्तोऽयं विद्यते यत् मनुष्य एव अस्य संसारस्य केन्द्रं विद्यते । महर्षि: व्यास: कथनेऽस्मिन् एवं वक्तुकामोऽस्ति –

**गुह्यं ब्रह्म तदिदं ब्रवीमि ।**
**नहि मानुषात् श्रेष्ठतरं हि किञ्चित् ॥**

मानवताया: उन्नायकं तत्त्वं पुरुषार्थ: एवास्ति । महर्षे: व्यासस्य शब्देषु सिद्धान्तोऽयं पाणिवादस्य नाम्ना विख्यातो विद्यते । जगति येषां जनानां पार्श्वे 'करा:' विद्यन्ते–ये कर्मणि दक्षा: सन्ति तथा च उत्साहिनो विद्यन्ते–तेषां सर्वे अर्था: सिद्धा: भवन्ति । दृश्यतां पद्यमिदम्–

**अहो सिद्धार्थता तेषां सन्तीह पाणय: ।**
**अतीव स्पृहये येषां सन्तीह पाणय: ॥**

न पाणिलाभादधिको लाभ: कश्चन विद्यते । किमधिकम् ? महर्षे: व्यासस्य राष्ट्रभावना अतीव उदात्ता, विशुद्धा तथा ओजस्विनी विद्यते । राजा



राष्ट्रस्य केन्द्रं भवति । भारतीयराजा प्रजातन्त्रयुगस्य अधिनायकानां दुर्गुणेभ्य: सर्वथा मुक्तो भवति तथा च स्वेच्छाचारिणां राज्ञां दोषेभ्योऽपि विहीनो भवति । स: भवति प्रजानां सर्वभावेन हितचिन्तक: तथा च मङ्गलसाधक: । भारतीयधर्म एव राजमूलको भवति अर्थात् धर्मस्य व्यवस्थाया: संचालनस्य च उत्तरदायित्वं राज्ञ: एवोपरि वर्तते ।

दृश्यताम् अत्र –

**राजमूलो महाप्राज्ञ ! धर्मो लोकस्य लक्ष्यते ।**
**प्रजा राजभयादेव न खादन्ति परस्परम् ।**
**मज्जेद् धर्मस्त्रयी न स्याद् यदि राजा न पालयेत् ॥**

भारतं कृषिप्रधानं राष्ट्रं विद्यते । अत: महर्षे: व्यासस्य आग्रह: वर्तते यत् य: नेता स्वयं कृषिं न करोति, क्षेत्रं न कर्षति, न वपति स: नेता राष्ट्रस्य समितौ न गन्तुं शक्नोति –

**स न समितिं गच्छेद् यश्च नो निर्वपेत् कृषिम् ।**

महर्षि: व्यास: शान्तिपर्वणि अकथयत् –

**वेदस्योपनिषत् सत्यं सत्यस्योपनिषद् दम: ।**
**दमस्योपनिषन् मोक्ष एतत् सर्वानुशासनम् ॥**

वस्तुत: संस्कृतसाहित्ये महाभारतस्य स्थानं महत्त्वपूर्णं विद्यते, नास्ति विषयेऽस्मिन् कोऽपि सन्देह: ।

# संस्कृतप्रसारपरिषद्, आरा

## संक्षिप्तम् इतिवृत्तम्

- **स्थापनातिथिः** 22.2.1987
- **निबन्धनसंख्या** 424/1994-95
- **कार्यालयः-** संस्कृतप्रसारपरिषद्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा (विहारः) 802301, दूरभाषसंख्या - (06182) 224193
- **आरण्यकम्** (अर्धवार्षिकं संस्कृतशोधपत्रम्, प्रतिवर्षं मार्च, सितम्बरमासयोः प्रकाश्यमानम्)
- पञ्जीकरणसंख्या - RNI 58951/94
- संस्कृतविदुषां सम्मानः (प्रतिवर्षं क्रियमाणः)। अथ सम्मानिताः विद्वांसः-

| | | सम्माननवर्षम् |
|---|---|---|
| 1. | पण्डित कमलाकान्त उपाध्यायः | 1988 |
| 2. | पण्डित चन्द्रशेखर पाठकः | 1989 |
| 3. | पण्डित सीताराम उपाध्यायः | 1989 |
| 4. | पण्डित सभानाथ पाठकः | 1990 |
| 5. | पण्डित रङ्गनाथ पाण्डेयः | 1990 |
| 6. | पण्डित रामेश्वरनाथ पाठकः | 1992 |
| 7. | पण्डित केदारनाथ शुक्लः | 1993 |
| 8. | पण्डित जनार्दन मिश्रः | 1994 |
| 9. | पण्डित रामनरेश त्रिपाठी | 1995 |
| 10. | पण्डित रामनारायण पाण्डेयः | 1995 |
| 11. | पण्डित रामप्रवेश त्रिपाठी | 1996 |
| 12. | पण्डित गिरिजानन्दन मिश्रः | 1997 |
| 13. | पण्डित अम्बिकादत्त त्रिपाठी 'व्यासः' | 1998 |
| 14. | पण्डित डॉ० श्यामानन्द झा | 1999 |
| 15. | पण्डित व्रजभूषण मिश्र 'आक्रान्तः' | 2000 |
| 16. | पण्डित जगदीश्वर प्रसाद मिश्र 'नलिनः' | 2000 |
| 17. | पण्डित जयानन्द मिश्रः | 2001 |

- प्रकाशितानि - 12 पुस्तकानि (विवरणं शोधपत्रस्य पृष्ठभागे)
- संस्कृतकविगोष्ठी-संस्कृतविचारगोष्ठीनाम् आयोजनम्
- संस्कृतसम्भाषणशिविराणाम् आयोजनम्
- महाविद्यालय/उच्च-मध्य-प्राथमिकविद्यालयस्तरीय-संस्कृतप्रतियोगितानाम् आयोजनम्
- वर्ष 2000 तः 'अन्नपूर्णादेवीस्मारिका संस्कृतप्रतियोगिता' द्वारा प्रतियोगितापुरःसरं पुरस्कार-प्रमाणपत्रादिवितरणम्।
- संस्कृतवर्षम् (1999-2000) उपलक्ष्य केन्द्रसर्वकारस्य अनुदानेन संस्कृतशिक्षक-प्रशिक्षणवर्ग - 51 संस्कृतसम्भाषणशिविर-संस्कृतसङ्गम (14 अप्रैल, 2000) इति संस्कृतसम्भाषण-अभियानसञ्चालनम्।

❖



<u>पुस्तकसमीक्षा</u>

# बुभुक्षा

### समीक्षकः – डॉ० सुनीलकुमार प्रधानः

पुस्तकस्य नाम–बुभुक्षा, रचयिता–**बनमाली बिश्वालः**, प्रकाशिका–पद्मजा प्रकाशनम्, 48/4A, मास्टर जहरुल हसन् रोड, पुरातनी सब्जी मण्डी, कटरा, इलाहाबाद–211002, उ०प्र०, दूरभाष:–0532–2641713, प्रकाशनवर्षम्–2001, मूल्यम्–150 रूप्यकाणि, पृष्ठसङ्ख्या–122

आधुनिकसंस्कृतकथाप्रणयनप्रक्रियायाम् एकममूल्यमवदानं विद्यते अयं कथासङ्ग्रहः 'बुभुक्षा'। रचयिता खलु बनमाली बिश्वालः लब्धप्रतिष्ठकथाकारः आशुकवित्वशक्तिसंवलितश्च गीर्वाणगगने ज्योतिरिव भासते। कथासङ्ग्रहेऽस्मिन् बुभुक्षायां चतुर्विंशतिः कथाः सङ्गृहीताः सन्ति। एतासु कथासु ग्रामीणनगरीययोः स्वच्छं दूषितञ्च जीवनं निरूपितमस्त्येव, मानवसमाजे व्याप्ताः कुरीतयः, समस्याः जीवनमूल्यस्यापघटनादयोऽपि सहजतया चित्रिताः सन्ति। एवं वक्तुं शक्नुमो वयं यत् कथासङ्ग्रहोऽयं विविधवर्णरञ्जिता कुशलचित्रकारस्यैका चित्रशाला वर्तते। अन्ते च प्रदत्तं 'The Stories at a glance' संस्कृतेतरेभ्यः कथाप्रेमिभ्योऽवबोधनाय प्रवर्तते तथा चैतेन कवेराङ्ग्लभाषाज्ञानमपि ऊरीभवति।

'कथायां सरसं वस्तु गद्यैरेव विनिर्मितमि'त्यनया साहित्यदर्पणकारिकया परिपुष्टोऽयं कथासङ्ग्रहः अपरन्तु पञ्चतन्त्रे हितोपदेशे च यथा मध्ये मध्ये वक्त्रापरवक्त्रछन्दांसि सुतरां चेतो रञ्जयन्ति तथाऽत्र न प्राप्यते। सम्भवतः हिन्दीकथानुगुणम् आधुनिकशैलीमन्वगछत् कविः। कथायाः उत्तमता हि विषये तथा च प्रतिपादनशैल्याम् आश्रिता भवति। अनया दृष्ट्या कथाकारोऽयं बिश्वालः सिद्धहस्तः प्रतिभाति। कथासु सर्वत्र उद्देशे साधने परिणामे च साम्ञ्जस्यं

विहितम्,न क्वापि स्खलनम् । वस्तुतः कथायाः उद्देशः एक एव स्यात् पुनश्च तमुद्देशं केन्द्रं मत्वा कृताः कथारचनाः नूनमेव सफलाः भवन्तीति विद्वांसः । इह हि कथासु उद्देशः प्रत्यक्षं स्पष्टश्चास्ति । किमपि वाक्यं तादृशं नास्ति येन पाठकानां ध्यानं विचलितं भवति । उद्देशपरिणामयोः ऐक्यप्रतिपादनात् कथाकारोऽयं सफलः कथारचना च सफला ।

कथारचनासन्दर्भे प्रसिद्धोऽयमाभाणकः यदारम्भिकवाक्येन अभीष्टपरिणामः नारप्स्यते चेत् प्रथमग्रासे मक्षिकापात एव । किन्त्वस्मिन् कथासङ्ग्रहे कथाकारः सर्वादौ विनिश्चिनोति यत् पाठकानां मनसि एषः सन्देशः गच्छेत् । तत्पश्चात् सन्देशं केन्द्रीकृत्य एतादृश्याः घटनायाः रचनां करोति या घटना अभीष्टसन्देशोत्पादने सततं सहायिका भवतीत्यतः एषा '**बुभुक्षा**' कुशलकथाशिल्पिनः रम्यरचना एव । उदाहरणतया द्रष्टव्याः एताः कथाः–**तमसाच्छन्ना दीपावली, वासुदेवस्य जन्मदिनम्, अभिशप्तः देवदासः, बुभुक्षेति** । कथानाम् उद्देशाः विषयाश्च विविधाः भवितुमर्हन्ति, किन्त्वावश्यकतास्ति केवलं वस्तु विनिर्धार्य तदनुरूपं चरित्रचित्रणस्याथवा चरित्रानुगुणं वस्तुविन्यासस्य । अत्र तु घटनाक्रमः अत्यन्तमुचितः सुघटितश्चास्त्येव घटनाक्रमस्य प्रत्येकं खण्डं कथानुरूपम् अधीनञ्च वर्तते । तद्यथा '**अभिशप्तः देवदासः**' इति कथायां ग्रामीणैः अशुभमुखः अशुभदर्शश्च मन्यमानः देवदासः निर्धनत्वं भजन्नपि सर्वेषां शुभाकाङ्क्षी । देवदासस्य स्वीयं जीवनचिन्तनं, लेखकस्य तम्प्रति आस्था, तस्य रहस्यमयं दिवङ्गमनमित्येताः पूर्वापराः घटनाः निर्विचिकित्सया चेतो हरन्ति । कथाकारस्य मानवमनोविज्ञानस्य सूक्ष्मान्वीक्षणमपि यथेष्टं ध्वन्यते ।

प्रायशः कथायाः मूले मानवजीवनस्य कश्चिदेकः पक्षः क्षणः विचारश्च विद्यमानः भवति । कथामाध्यमेन तु तत्पक्षस्य मानवभावनायाः वा उद्घाटनमेव जायते । मानवजीवनस्यैतदुद्घाटनं प्रत्यक्षतः वैयक्तिकविकासाय एव भवति । अनया दृष्ट्या **दुश्चरित्रा, प्रतिशोधः, लोभासक्तः कथाकारः, आधुनिकाचार्यः, बुभुक्षा** इत्येताः कथा उल्लेख्याः वर्तन्ते । एताभिः कथाभिः कथाकारेण दीयमानः सन्देशः मानवमनसः विकृतीः निराकर्तुमेकः स्तुत्यः प्रयास इव भासते ।

विविधतत्त्वानां प्रधानतायाः दृष्ट्या कथाः चतुर्विधाः, तद्यथा–घटनाश्रिताः, चरित्राश्रिताः, वातावरणाश्रिताः, भावाश्रिताश्च । घटनाश्रितासु कथासु कस्यांश्चिद् दैवीघटनायां संयोगे च कथानकमवलम्बितं भवति । कलादृष्ट्या एतादृश्यः कथाः



सामान्याः यत एतादृश्यां कथायां सूक्ष्मभावाभिव्यञ्जनायाः अपेक्षया स्थूलमनोरञ्जनस्यैव प्राधान्यं भवति । चरित्राश्रिताः कथाः मनोविज्ञानस्य पृष्ठभूमौ चरित्रस्य विविधानां सूक्ष्मवैशिष्ट्यानामुद्घाटनं कुर्वन्ति । अपरन्तु, कस्यचिद् युगविशेषस्य देशस्य वा सभ्यतासंस्कृत्यादीनाम् अवलोकनं वर्णनैः संवादैश्च विधीयते । तादृश्यः कथाः वातावरणाश्रिताः । पुनश्च, भावाश्रिताः कथाः प्रायशः चरित्रं वातावरणञ्च पोषयन्ति । एतादृशीषु कथासु कस्यचिदेकस्य भावस्य विचारस्य चाऽऽधारेणैव कथानकस्य विकासः भवति । प्रतीकात्मकानां चरित्राणां वातावरणस्य चात्र समीचीना योजना करणीया भवति कथाकारैः ।

बुभुक्षेति कथासङ्ग्रहेऽस्मिन् कथायाः कानिचन रूपाणि दरीदृश्यन्ते– चरित्राश्रितासु कथासु **किन्नरः, दुश्चरित्रा, अभिशप्तः देवदासः, बुभुक्षेत्यादयः** । भावाश्रिताः कथाः सन्ति–**अपूर्वं पारिश्रमिकम्, परधर्मो भयावहः, सनाथोऽपि अनाथालये, बलिदानञ्चेति** । शिष्टासु कथासु **तमसाच्छन्ना दीपावली, वासुदेवस्य जन्मदिनम्, अध्यापकस्य करुणकथा** इत्यादयः वातावरणाश्रिताः कथाः सन्ति । एतदतिरिच्य कथायाः उपप्रकारा अपि प्राप्यन्ते, ते च प्रतीकवादि–सामाजिक– मनोवैज्ञानिक–ऐतिहासिकसाहसिकादयः । एतेषु कथाप्रकारेषु **कदा आगमिष्यति दूरभाषः, सुखरामस्य सुखनिद्रा** प्रतीकवादिनी सामाजिकी वा कथा, किन्तु **आधुनिकाचार्यः, बाघासाहेबः, वासुदेवस्य जन्मदिनम्** इत्येताः मनोवैज्ञानिककथारूपेण गण्याः सन्ति ।

अथ च कथायाः विकासक्रमे केचन पक्षाः अवधातव्याः –

(क) **कथावस्तु**–घटनानां तन्तुजालम् एव कथावस्तु । मानवजीवने भ्राम्यमाणौ सुखदुःखात्मकौ पक्षौ उद्घाटयितुं कथाकारः न केवलं घटनानां घातप्रतिघातयोरायोजनं कुरुते अपितु व्यक्तेर्मनोलोकमुपस्थापयितुम् अन्तर्द्वन्द्वस्यापि आश्रयणमङ्गीकरोति । एतेनैवान्तर्द्वन्द्वेन कथाः सफला इति विद्वांसः । कथाविकासस्य केचन बिन्दवः द्रष्टव्याः–आरम्भः आरोहावरोहौ चरमस्थितिश्च । कथाशीर्षकेण आरम्भिकानुच्छेदेनैव पाठकः कथासूत्रं जानीयात् तादृशः कथाकारस्य यत्नः । कथारम्भः पात्रपरिचयेन ( **दुश्चरित्रा** ), वातावरणविशेषस्य चित्रणेन ( **अध्यापकस्य करुणकथा** ), पात्राणां पारस्परिकवार्तालापेन च ( **अपूर्वं पारिश्रमिकम्, अभिशप्तः देवदासः** ) भवति चेदुत्तमम् । वस्तुतः कथारम्भः पाठकस्य मनसि कौतूहलं

जिज्ञासाञ्च जनयेत्, तादृशः यत्नः कथासङ्ग्रहेऽस्मिन् बहुधा लक्ष्यते । एतेन सह कथायामारोहावरोहौ तस्याः कथायाः चरमस्थितिश्च श्लाघ्या वर्तन्ते ।

(ख) **चरित्रचित्रणम्**–कथायाः इतिहासः प्रमाणीकरोति यत् कथासु पात्रयोजना स्यादेव, चरित्रचित्रणन्त्वावश्यकं तत्त्वम् एव । कथाविकासस्तु पात्रैरेव भवतीत्यतः बह्व्यः सरण्यः दृष्टिगोचराः भवन्ति । इह हि (कथासङ्ग्रहे) कथाकारेण पात्रस्य प्रत्यक्षवर्णनं कृतं यत् सर्वथा कलात्मकतानुगुणं नास्ति । श्रेष्ठकथालेखकस्तु पात्रेषु स्वव्यक्तित्वस्यारोपं न करोति न च चरित्राणि आकस्मिकघटनास्वेव निर्भराणि भवन्ति । अत एवात्र चरित्राङ्कने एकरसतादयो दोषाः अवलोक्यन्ते । कासुचित् कथासु यथा-अपूर्वं पारिश्रमिकम्, वासुदेवस्य जन्मदिनम्, बुभुक्षेति कथोपकथनेनैव माध्यमेन पात्राणां यत् व्यक्तित्वस्योद्घाटनं विहितमस्ति तत् कथाशिल्पविधाने एकः स्तुत्यः प्रयासः ।

(ग) **संवादः**– कथासौन्दर्यस्य समृद्धये कथोपकथनस्य संवादस्य वा महती भूमिका वर्तते । संवादरहिताः अल्पसंवादयुताः वा कथाः अभीष्टप्रभावोत्पादिकाः न भवन्ति । 'सनाथोऽपि अनाथः' कथा स्वकीयं प्रभावं स्फुटसंवादानन्तरमेव प्रदर्शयति । वस्तुतः संक्षिप्तेषु संवादेष्वेव पात्राणां मानसिकान्तर्द्वन्द्वान् अन्याञ्च मनोभावान् प्रकटयितुं शक्तिर्भवति । आञ्चलिकशब्दानां तन्नाम वातावरण-स्थान-कालानुगुणं संवादेनैव कथासु सजीवता उत्पद्यते –

**'बाबू महाशयाः ! पादत्राणकूर्चनम् अपेक्ष्यते वा ?'**

(अपूर्वं पारिश्रमिकम् )

**'अरे ! बहिर्गत्वा बीडीं पिब । बहिर्गत्वा पिबावः ? यानं तु चलायमानमस्ति.................।'** (राजधानी-यात्रा)

अत्रोल्लिखितासु कथासु कस्याञ्चन कथायां संवादः नास्त्येव, अस्त्यपि चेत् अल्प एव दृश्यते ।

(घ) **देशकालौ वातावरणं वा** – कथावस्तु पात्रञ्च देशकालाभ्यां सहैव विकासमाप्नुतः । प्रभाववृद्धये रसनिष्पत्तये च वातावरणस्य सहजचित्रणमावश्यकमिति कथासमीक्षकाः । वातावरणस्य विषये कश्चनापि व्यतिक्रमः कथायाः सजीवता-स्पष्टता-प्रभावादीनां सृष्टौ अपकारको भवतीति निश्चप्रचम् ।



अतएव केचन कथाकाराः कथारम्भं वातावरणस्य चित्रणेनैव कुर्वन्ति । तद्वत् 'वासुदेवस्य जन्मदिनम्' सफलम् उदाहरणं विद्यते । देशकालवर्णने कथाकारः बिश्वालपादः दक्ष इति भाति ।

(ङ) **उद्देशः**–पञ्चतन्त्र-हितोपदेशादीनां कथाः मनोरञ्जनन्तु कारयन्त्येव एकमादर्शजीवनोन्मुखं सन्देशमपि ददति । आधुनिक्यः कथास्तु मनोरञ्जनार्थं सर्वथा न सन्ति अपितु कथासु कथाकारस्य दृष्टिकोण ऊररीभवति । कथाकारस्य उद्देशाः भिन्ना भवितुमर्हन्ति आदर्शोन्मुखाः यथार्थोन्मुखाश्च । किन्तु कथासु निरूपितं जीवनदर्शनं स्वस्थं स्यात् । कथाकारोऽयं बिश्वालवर्यः उद्देशं प्रति सततं जागरूकोऽस्तीति प्रतीयते । प्रायशः कथाः यथार्थोन्मुखिन्यः सन्ति । कथामाध्यमेन अत्र जीवनस्य मार्मिकानुभूतेः व्याख्या सोद्देश्यं प्रस्तुतास्ति ।

(च) **शैली**–कथा वर्णयितुं कथाकारेणाङ्गीकृता विशिष्टा पद्धतिरेव शैली तथा च कथां प्रस्तोतुं कथाकारस्य रचनाविधानम् (Technique) कथायाः जीवनतत्त्वम् । वर्णनात्मिका आत्मकथात्मिका, संवादात्मिकादयः शैल्यः प्रायशः कथाकारैरनुशील्यन्ते तथापि सर्वप्रचलिता शैली वर्णनात्मिका एवास्तीत्यतः कथाकारेण बनमाली बिश्वालवर्येण वर्णनात्मिका शैली एवाऽनुश्रिता । कथासौन्दर्यस्य विधानं शैलीमाध्यमेनैव भवति । अतः अत्र कथाकारेणालङ्कार-लोकोक्तिप्रतीकाद्युपकरणैः कथासौन्दर्यं रक्षितम् । कथाकारस्य शैल्यां हास्य-व्यङ्ग्य-चित्रोपमतादीनां समायोजनमपि सुतरां श्लाघ्यम् (द्रष्टव्याः कथाः-लोभासक्तः कथाकारः, आधुनिकाचार्यः, बाघासाहेबः) ।

सामाजिकपरिवेशस्य प्रभावस्य अनुभूतिः नव्यायाः कथायाः मूलस्वरः । सामाजिकपरिवेशः द्विविधः-ग्रामीणः नगरीयश्चेति । ग्रामीणजीवनस्य समस्याः कुरीतयः, सामान्यजनानां जीवनशैली च यत्र प्रस्तूयते तादृश्यः कथाः ग्रामकथाः । नगरीये परिवेशे चित्रितं कृत्रिमजीवनप्रणाली, स्त्रीपुरुषयोः कटुता, व्यक्तेः एकाकिभावः, जीवनमूल्यानां विघटनञ्च नगरकथाः सूचयन्ति । ग्रामघटनाश्रितासु कथासु **तमसाच्छन्ना दीपावली, दुश्चरित्रा, अभिशप्तः देवदासः, सुखरामस्य सुखनिद्रा** च उल्लेख्याः सन्ति । नगरपरिवेशाश्रिताः कथाः सन्ति-**अपूर्वं पारिश्रमिकम्, वासुदेवस्य जन्मदिनम्, सनाथोऽपि अनाथालये, न हृतः न हारितः**, बुभुक्षेति । अतः अहमति वक्तुं प्रभवामि 'ग्रामजीवनं नगरजीवनञ्चायं कथाकारो युगपत् नैपुण्येन

विवृणुते' (सागरिका 34/3)

समस्याग्रस्तेऽस्मिन् संसारे मानवानां स्थितिः जीवनशैली चातीव चिन्तनीया विद्यते । आत्मकेन्द्रिते समाजे जनाः केवलं कामिजनवत् स्वतां पश्यन्ति । कथालेखनप्रसङ्गे कथाकारोऽयं नव्यशैलीकारः इव दृश्यते । कथासु केचन हृद्याः प्रसङ्गाः अवधातव्याः । **तमसाच्छन्ना दीपावलीति** कथायां परिजनानाम् आवश्यकतापूर्त्त्येऽक्षमः दिनेशस्य पिता समाजस्य असमानव्यवस्थामनुभूय भृशमकुप्यत – **'वयं श्रमजीवाः स्मः । श्रमं कृत्वा परस्य भूमौ सुवर्णमुपार्जयामः । परन्तु अस्माकमत्यावश्यकं प्रयोजनमपि न सेत्स्यति ।'** अत्र कथाकारस्य समाजवादस्वरः मुखरितोऽस्ति । अन्यत्र शङ्कर्याः वेदनापि न्यूना नास्ति । वासुदेवस्य पितुः पुण्डरीकस्य दुष्कृत्यस्य फलमनुभवन्ती कारागृहे निबद्धा वात्सल्यप्रतिमाम्बा शङ्करी– **'कोऽयं निर्दयो नियमः निर्मितः कारागृहाधिकारिभिः ।.........किं तेषां गृहे अपत्यानि न सन्ति ?.........यदि एते शिशूनां भाविजीवनविषये मननशीलाः सन्ति तर्हि किमर्थं न मुञ्चन्ति सर्वाः मातृः कारागृहात्'** (वासुदेवस्य जन्मदिनम्)। एषा कथा न केवलं ममतामयीमातुः दर्शनं कारयत्यपितु मानवीयमौलिकगुणानामनादरं दुर्नीतिमार्गानुसरणञ्च दर्शयति । देवदासस्य अन्तव्यर्थापि समाजिकीं विशृङ्खलतां निर्दिशति '...........**बहवः मां स्वगृहकार्यार्थम् आह्वयन्ति । किन्तु पुनः ते वदन्ति किञ्चित् विलम्बेनैव आगच्छतु । प्रातः मम मुखं दृष्टं चेत्.........मृत्युशङ्कया । एतादृशे अवसरे किमन्यत् करोमि ऋते उपेक्षायाः ।'** (अभिशप्तः देवदासः)

भगिन्याः सम्मानरक्षणाय यत् किमपि करणीयमासीत् तत्सर्वं राजेन्द्रेण कृतम् (बलिदानम्)। न केवलं राजेन्द्रेण अपितु कमलेशोऽपि तादृश एव कथानायकः यः सर्वां सामाजिकीम् उपेक्षां सहते (अध्यापकस्य करुणकथा) । पङ्गुयुवकः (बुभुक्षा) भवतु अथवा सुखरामः (सुखरामस्य सुखनिद्रा) प्रायशः एतादृशानि पात्राणि नैराश्येनैव अकरणीयमपि कर्तुमुत्सहन्ते । जनमानसे विद्यमानान् विविधकुत्सितभावान् अपाकर्तुमुद्युक्तः व्याकुलश्चास्ति कथाकारः । वस्तुशिल्प-रचनाशिल्पयोः अपूर्वं सामञ्जस्यं वरीवर्ति । कथारम्भात् पूर्वं कथाकारः 'अकथा' इति लिखित्वा पक्षद्वयमुपस्थापयति इति मन्ये । प्रथमः पक्षः कथा नास्तीति । अपरश्च पक्षः, मूलतः 'अकथा' हिन्दीसाहित्यस्यैकं कथाऽऽन्दोलनं सूचयति ।



अकथैषा पाश्चात्यानां 'Anti movement' इत्यनेन आविर्बभूव । एतस्यामकथायां परम्परागतकथास्वरूपस्य विरोधः प्राप्यते ।

समासतः एतस्य कथासङ्ग्रहस्य 'बुभुक्षा' इत्यस्यानुशीलनेन कानिचन वैशिष्ट्यानि अवलोक्यन्ते । तद्यथा, कथापक्षे–संस्कृतसम्भाषणक्षमा भाषा, अल्पसमासप्रयोगः आदर्शयथार्थयोः मञ्जुलमङ्गलयोगः, कलवेरं चित्तावर्जकम्; कथाकारपक्षे–संस्कृतभाषायाः सम्प्रेषणीयताभिवर्धनाय नूतनशब्दनिर्माणम्, यथार्थोन्मुखं चिन्तनम्, मानवमनोविज्ञानस्य सूक्ष्मान्वीक्षणम्, नव्यशैल्याः आश्रयणं प्रवर्त्तनञ्च । कथासङ्ग्रहे (पुस्तकेऽस्मिन्) मुद्रणदोषाः बहुधा प्राप्यन्ते । आशासे अग्रिमसंस्करणे एते दोषाः न स्युः । केचन नित्यदोषाः (आक्रष्टुं, मूहूर्ते, तादृशि, दत्वा, स्पर्शेण इत्यादयः) कथासौन्दर्यं भाषासौष्ठवञ्च अपकुर्वन्ति । आगच्छता कालेन कथाकारोऽयं बिश्वालवर्यः नूतनकाव्यप्रणयनैः गीर्वाणवाणीं भूषयिष्यतीति शम् ।

# किंचित् पारिभाषिकम्

काशिकावृत्तौ अष्टाध्यायीगतानां सूत्राणां शब्दाः यथा परिभाषिताः तथा सूत्र-तत्संख्योल्लेखपुरःसरम् अध्यायक्रमेणात्र संगृह्यन्ते।

1. **लक्षणम्** लक्षणशब्दो निमित्तपर्यायः
   अ०वृद्धो यूना तल्लक्षणश्चेदेव विशेषः १.२.६५
2. **विशेषः** विशेषो वैरूप्यम्
   अ० १.२.६५
3. **उपदेशः** उपदिश्यतेऽनेन इत्युपदेशः, शास्त्रवाक्यानि – सूत्रपाठः खिलपाठश्च
   अ० उपदेशेऽजनुनासिक इत् १.३.२
4. **आनुनासिक्यम्** प्रतिज्ञानुनासिक्याः पाणिनीयाः
   अ० १.३.२
5. **अन्त्यम्** अन्ते भवम् अन्त्यम्
   अ० हलन्त्यम् १.३.३
6. **यथासंख्यम्** यथासंख्यं यथाक्रमम्
   अ० यथासंख्यमनुदेशः समानाम् १.३.१०
7. **अनुदेशः** अनुदिश्यते इत्यनुदेशः, पश्चादुच्चार्यत इत्यर्थः
   अ० १.३.१०
8. **अधिकारः** अधिकारः विनियोगः
   अ० स्वरितेनाधिकारः १.३.११
9. **स्वरितत्वम्** प्रतिज्ञास्वरिताः पाणिनीयाः
   अ० १.३.११
10. **कर्म** कर्मशब्दः क्रियावाची
    अ० कर्त्तरि कर्म्मव्यतिहारे १.३.१४
11. **व्यतिहारः** व्यतिहारो विनियमः
    अ० १.३.१४
12. **कर्मव्यतिहारः** यत्र अन्यसंबन्धिनीं क्रियाम् अन्यः करोति इतरसंबन्धिनीं चेतरः स कर्मव्यतिहारः
    अ० १.३.१४



# संस्कृतसौरभसञ्चयनम्

(अप्रकाशितसंस्कृतकाव्यनाटकादीनां संग्रहः प्रकाशनं च)

संस्कृतप्रसारपरिषच्छोधपत्रस्य 'आरण्यक'स्य परिशिष्टम्

## पञ्चमं पुष्पम्

# श्रवणकुमारचरितम्

प्रणेता

**पण्डित व्रजभूषण मिश्र 'आक्रान्तः'**

संस्कृतप्रसारपरिषद्, आरा (बिहार) — सरस्वती नः सुभगा मयस्करत्

सम्पादकः

**डा० गोपबन्धु मिश्रः**

❑ पञ्चमं पुष्पम्

❑ श्रवणकुमारचरितम्
(गद्यनिबद्धम्)

❑ प्रणेता
पण्डित व्रजभूषण मिश्र 'आक्रान्तः'

❑ सम्पादकः
डा० गोपबन्धु मिश्रः

❑ प्रकाशिका
संस्कृतप्रसारपरिषद्
मारुतिमन्दिरम्, प्रकाशपुरी
आरा (विहारः)

❑ मुद्रकः
आरा प्रिन्टर्स
गोला महल्ला (निकट जैन स्कूल), आरा


# पुरोवाक्

पण्डित व्रजभूषण मिश्र 'आक्रान्त' महोदयेन विरचितं 'श्रवणकुमारचरितम्' इदंप्राथम्येन प्रकाश्य संस्कृतप्रसारपरिषदियं परमं मोदमनुभवति । 'आक्रान्त'महोदयः अस्याः परिषदः संस्थापकोऽध्यक्षः आरण्यकस्य प्रधानसम्पादकश्चासीत् । ३०मार्च, २००२ दिनाङ्के एव माननीयः 'आक्रान्त'महाभागः शोकाकुलान् प्रियपरिजनान् संस्कृतानुरागिणः सहस्रशश्च जनान् परित्यज्य गोलोकवासी अभवत् । जीवनस्य अन्तिमेषु त्रिषु वर्षेषु एष महाभागः हनुमच्चरितम्, ध्रुवचरितम्, श्रवणकुमारचरितम्, बालभक्त प्रह्लादः, आत्मचरितम् चिन्तनानि इति षट् गद्यबद्धाः रचनाः रचितवान् आसीत् । स्वजीवनकाले 'हनुमच्चरितम्' इति ग्रन्थस्य प्रकाशनं प्रारब्धमपि पूर्णतां न अवाप्नोत् । इदानीं तत् पुस्तकं परिषदः पक्षतः स्वतन्त्रतया प्रकाशितं जातमिति तस्य पुण्यात्मनः परमधाम्नि सन्तोषाय परमश्रद्धया तत् प्रकाशनं समर्पितमस्ति । 'ध्रुवचरितम्' आरण्यकस्य मार्च, २००२ अङ्के प्रकाशितमस्ति । आरण्यकस्य आधुनिके सितम्बर, २००२ अङ्केऽस्मिन् आक्रान्तमहोदयस्य 'श्रवणकुमारचरितम्' इदं परिशिष्टरूपेण प्रकाश्यमानमस्ति ।

संस्कृतप्रसारपरिषदः शोधपत्रेऽस्मिन् आरण्यके 'संस्कृतसौरभसञ्चयनम्' इत्याख्यया योजनया अप्रकाशितानां संस्कृतकाव्यनाटकदर्शनादिग्रन्थानां सम्पादनपुरःसरं प्रकाशनम् उद्दिष्टमस्ति । प्रकाश्यमाना ग्रन्था अत्र 'पुष्प'रूपेण आख्याताः सन्ति तेषां सौरभं सर्वत्र सञ्चरेदिति लक्ष्यत्वात् । अस्यां योजनायां प्रकाशितानां पुष्पाख्यानां ग्रन्थानामिदं विवरणमस्ति –

| पुष्पम् | ग्रन्थः | रचयिता |
|---|---|---|
| प्रथमम् | सुदामचरितम् | पं. बहोर पाठकः |
| द्वितीयम् | उपेन्द्रविज्ञानदर्शनम् | पं. उपेन्द्रदत्त शर्मा |
| तृतीयम् | भावनाविलासशतकम् | पं. उपेन्द्रदत्त शर्मा |
| चतुर्थम् | ध्रुवचरितम् | पं. व्रजभूषण मिश्र 'आक्रान्तः' |

इदानीमेतत् 'श्रवणकुमारचरितं' पञ्चमपुष्परूपेण प्रकाश्यमानमस्ति । शोधपत्रे प्रकाशनात् अनन्तरम् अस्य ग्रन्थस्य पुस्तकरूपेण स्वतन्त्रं प्रकाशनं विधास्यते ।

इदं 'श्रवणकुमारचरितम्' प्रसिद्धां प्राचीनां च कथामाश्रित्य रचितमस्ति । नवं वयः किन्तु स्वार्थचिन्तनशून्यता, अर्थाभावः किन्तु सेवया जीवनं सार्थकीकर्तुं सततप्रयासः, नेत्रहीनौ पितरौ किन्तु तयोः सेवैव जीवनस्य लक्ष्यम्, वक्षसि बाणः किन्तु तृषितयोः पित्रोः कृते जलं प्रापयितुं राजानं दशरथं प्रति प्रार्थना, यौवने एव कठोरतीरप्रहारेण प्राणत्यागे विवशता किन्तु नेत्रहीनयोः मातापित्रोः सेवा संरक्षा च यथा निरन्तरं स्यात् तदर्थं राज्ञः दशरथस्य निकटे कातरनिवेदनं च इति विलक्षणाः विशिष्टताः "श्रवणकुमारः" इति नाम्ना अभिधातुं शक्यन्ते । अस्मिन् ग्रन्थे एतादृशम् उदात्तचरितं पण्डित व्रजभूषणमिश्र 'आक्रान्त' महोदयेन अत्यन्तं सरलया भाषया समुदीरितमस्ति । श्रवणकुमारस्य तपोनिष्ठसेवाभावनया महात्मागान्धिसदृशाः महान्तः स्वजीवने सत्प्रेरिताः आसन् । आक्रान्तमहोदयोऽपि एतेन चरितेन सुतरां प्रभावितो भूत्वा चरितमिदं संस्कृतेन रचितवान् इति साक्षात् प्रतीयते । तस्य सहजसुलभभाषाप्रयोगः एतस्य चरितस्य महत्त्वमधिकं वर्धयत्येव ।

श्रवणकुमारचरितस्याऽस्य प्रकाशनेन संस्कृतसाहित्यरत्नाकरः अपरेण एकेन रत्नेन योजितः भूत्वा समृद्धतरः भविष्यति इति आशास्य सहृदयानां पक्षतः एतस्य ग्रन्थस्य सम्यग् विमर्शं च प्रतीक्ष्य विरम्यते ।

**गोपबन्धु मिश्रः**

सम्पादकः

# श्रवणकुमारचरितम्

अयोध्यानगरं निकषा एकं सुन्दरम् उपवनम् आसीत् । तस्मिन् उपवने फलेन नम्राः तरवः तु आसन् एव वनस्पतयः लताः च फलपुष्पयुताः राजन्ते स्म । उपवनस्य धरा सुकोमला, प्रशस्ता, हरिततृणमण्डिता, पवित्रा, योगिनां यतीनाञ्च हृदयहारिणी समाधियोग्या च आसीत् ।

तदानीम् अयोध्यायां इक्ष्वाकुवंशीयस्य रघोः पुत्रस्य महाराजाधिराजस्य 'अज' स्य शासनम् आसीत् । तस्य राज्ञः राज्ये जनजीवनं तु सुखमयम् आसीत् एव वनेषु उपवनेषु च पशुजीवनम् अपि सुशासितं सुव्यवस्थितं च आसीत् । अत एव तस्मिन् उपवने हिंसकपशुभ्यः भयं न आसीत् । धर्मात्मनः राज्ञः राज्ये भयम् अपि भीत्वा न जाने कुत्र गतम् आसीत् ।

तत् उपवनं निकषा उत्तरस्यां दिशि सरयूनदी प्रवहति स्म । नद्याः पर्यायवाचिषु नामसु कल्लोलिनी, तरङ्गिणी च नाम सरय्वाः कृते एव सार्थकं प्रतीयते स्म यतः सा कलकलनादिनीत्वात् कल्लोलिनी इति सार्थकनाम्नी, उत्तुङ्गतरङ्गत्वात् तरङ्गिणी इति सार्थकनाम्नी च आसीत् । अस्याः नद्याः जलं पावनं तृप्तिकरं स्वास्थ्यकरं च मन्यते स्म ।

एतस्याः नद्याः तटस्य अनतिदूरे अवस्थिते तस्मिन् उपवने ऋषयः मुनयः व तपस्यानिरताः दृश्यन्ते स्म । कश्चित् भस्मभूषितः जटिलः कौपीनधारी, कश्चित् गैरिकवसनमण्डितः खल्वाटः, कोऽपि श्वेताम्बरः, कश्चित् बालब्रह्मचारी, कश्चित् सपत्नीकश्च । इत्थं बहुवेशधारिणः साधवः महात्मानः च, केचन पर्णकुटीषु, केचन धरातले निर्मितासु गुहासु, केचन वृक्षाणाम् अधः चत्वरेषु, केचन च आकाशस्य तले एव उपविश्य ध्यानमग्नाः तपोरताः च दृश्यन्ते स्म । सम्पूर्णम् उपवनं विविधविधैः तपस्विभिः पूर्णम् आसीत् ।

अयोध्याधिपतेः धर्मात्मनः अजस्य राज्ये जनाः धर्मात्मानः आसन् । अतएव तस्मिन् उपवने तपस्यानिरतानां महात्मनां दर्शनार्थं जनाः तत्र गच्छन्ति स्म । न केवलं गच्छन्ति स्म, अपितु महात्मनां जीवनसञ्चालनाय

कन्दमूलफलवस्त्रादीनाम् उपहारम् अपि नीत्वा तेभ्यः समर्पयन्ति स्म । अत एव तत् उपवनं "तपस्वि उपवनम्" इति अभिधीयते स्म ।

तस्मिन्नेव तपोवने एकः सपत्नीकः महात्मा तपः करोति स्म । स च महात्मा नेत्राभ्याम् अन्धः तु आसीत् एव तस्य पत्नी अपि नेत्रविहीना आसीत् । तयोः एकः पुत्रः अपि आसीत् । पुत्रस्य नाम श्रवणकुमारः आसीत् ।

स च श्रवणकुमारः अयोध्यायाः पार्श्वस्थजनपदेषु कस्यचित् ग्रामस्य निवासी आसीत् । तस्य अज्ञातनाम्नः पितुः कस्मिँश्चित् वैश्यपरिवारे जन्म आसीत् । स च वैश्यपरिवारः धार्मिकः, विवेकशीलः, नीतिपरायणः, अतिथिप्रियः, कृषिकार्यनिपुणश्च आसीत् । तस्य परिवारस्य पूर्णप्रभावं गृहीत्वा तस्य पिताऽपि परमधार्मिकः अभवत् । बाल्यादेव स सदा परमात्मपरायणः भूत्वा पितुः गार्हस्थ्यजीवने पूर्णसहयोगं करोति स्म । विवाहयोग्यः भूत्वा अपि तस्य मनसि विवाहस्य आकाङ्क्षा न उत्पद्यते स्म । एतदर्थं तस्य पितरौ चिन्तितौ भवतः स्म । किन्तु, स सांसारिकतायाः बन्धने बद्धुं न इच्छति स्म । एवं कालक्रमेण स यौवनम् उल्लङ्घ्य प्रौढतां प्राप्तवान् । सदा कृषिकार्यसंलग्नस्य तस्य कृषिकार्यसहयोगकर्तुः कस्यचित् शूद्रस्य श्रमिकस्य कन्यया सह आत्मीयता अवर्द्धत । सा शूद्रकन्या अपि बाल्यात् एव वीतरागिणी, तपस्विनी, ब्रह्मचारिणी च आसीत् । अतएव यौवनस्य सीम्नः पारंगता अपि केनापि सह प्रणयसूत्रेण बद्धा नासीत् । शूद्रस्य सा कन्या रूपवती तु आसीत् एव गुणवती अपि आसीत् । तस्याः सद्व्यवहारेण अज्ञातनामा श्रवणकुमारस्य पिता प्रभावितः अभवत् । क्रमेण सा आत्मीयता प्रेम्णः रूपं धृतवती । पूर्वजन्मनः संस्कारेण तौ स्नेहसूत्रेण सम्बद्धौ । शनैः शनैः एतस्य सम्बन्धस्य घोषणा जाता । श्रवणकुमारस्य अज्ञातनाम्नः पितुः पिता तदानीं वृद्धः आसीत् । माता अपि वृद्धा आसीत् । यदा पुत्रस्य प्रौढावस्थायां शूद्रकन्यया सह वैवाहिकजीवनस्य समाचारं ज्ञातवन्तौ तदा तौ वीतरागौ भूत्वा गार्हस्थ्यं पुत्राय समर्प्य वानप्रस्थजीवनं प्रगृह्य गृहात् बहिः निर्गतौ ।

स च श्रवणकुमारस्य अज्ञातनामा पिता तया शूद्रकन्यया सह गार्हस्थ्यजीवनं व्यत्यायितुम् आरब्धवान् । यद्यपि श्रवणकुमारस्य माता शूद्रकन्या आसीत् तथापि सा सद्गुणसम्पन्ना आसीत् । पत्युः सेवां सा धर्मं मनुते स्म । सदाचारिणी सा सदा देवान्, महात्मनः, पितॄन् च स्मरति स्म तान् प्रति च कृतज्ञतां विज्ञापयति स्म । तस्याः शीलं नारीणां कृते अनुकरणीयम् आसीत् । यद्यपि



वर्णवैषम्यकारणेन कतिपयैः अयं सम्बन्धः न स्वीक्रियते स्म तथापि तयोः व्यवहारेण चारित्रिकोत्कर्षेण समाजे तस्य विशेषविरोधः न अभवत् ।

एवं कालक्रमेण सा शूद्रकन्या गर्भचिह्नं दधौ । गर्भमागते श्रवणकुमारे माता तु मोदमयी आसीत् एव पिता अपि परमां प्रसन्नताम् अलभत । ग्रामस्य जनपदस्य च जना मोदमानाः अभवन् । प्रकृतिः प्रसन्ना आसीत् । सर्वत्र प्रसन्नतातिरेकः दृश्यते श्रूयते च । प्रतीयते स्म कस्यचित् महापुरुषस्य आविर्भावः भविष्यति ।

यथा-यथा तस्याः शूद्रकन्यायाः गर्भः पुष्टः भवति स्म तथा-तथा ग्रामस्य जनपदस्य च समृद्धिः वर्द्धते स्म । कालक्रमेण ऋतुपरिवर्तनं स्वाभाविक्या रीत्या जायते । कस्मिन् अपि ऋतौ किमपि अस्वाभाविकं प्रातिकूल्यं न दृश्यते । न ग्रीष्मस्य प्रचण्डतापः कमपि पीडयति । न कदाचित् अतिवृष्ट्या अनावृष्ट्या अधिकेन हिमपातेन वा काचित् हानिः जायते । सस्यसमृद्ध्या जनपदस्य सर्वे जनाः प्रसन्नाः आसन् । एकं तु धर्मात्मनः अजस्य राज्यं, द्वितीयं कस्यचित् भक्तस्य गर्भे आगमनम् । कारणद्वयेन स्वर्गीयं सुखं सर्वे अनुभवन्ति स्म । यथा-यथा महापुरुषस्य जन्मवेला समीपम् आगच्छति स्म तथा-तथा समृद्धेः उत्कर्षः वर्द्धते स्म । एतादृशं सौख्यम् एतस्मात् पूर्वं जनैः कदापि न अनुभूतम् । फलानाम् उद्यानेषु फलाधिक्यं दृष्ट्वा तु वृद्धाः कथयन्ति स्म – न एतादृशं दृश्यं कदापि दृष्टम् । यद्यपि सुखदुःखात्मकोऽयं संसारः तथापि दुःखं किं कथ्यते इति तदानीं कोऽपि न अनुभवति स्म । जनयित्री माता पिता च उभौ अति मोदमानौ आस्ताम् । द्वौ प्रतिदिनं सुस्वप्नं पश्यतः स्म ।

एवं सः समयः समागतः यदा श्रवणकुमारः जन्म लब्धवान् । कार्तिकमासस्य शुक्लपक्षः आसीत् । तिथिः षष्ठी आसीत् । समयः पूर्वाह्णः आसीत् । अधिकं शैत्यं न आसीत् तथापि सूर्यस्य रश्मयः जीवान् सानन्दान् कुर्वन्ति स्म । तस्मिन् एव क्षणे अज्ञातनाम्नः पितुः गृहे शूद्रकन्यायाः मातुः गर्भात् शिशुः एकः प्रादुरभवत् । तस्य प्रादुर्भावकाले प्रसवगृहे विचित्रः प्रकाशः जातः । मातुः शरीरं प्रसवपीडां न अनुभूतवत् । तत्र उपस्थिताः सेवासंलग्नाः नार्यः कथयन्ति स्म—अस्माभिः अद्य प्रसवकाले यादृशः चमत्कारः दृष्टः तादृशः एतस्मात् पूर्वं कदापि न अवलोकितः । शिशोः मुखम् अद्भुतं वैलक्षण्ययुक्तं च अस्ति । ग्रामे जनपदे च सर्वत्र तस्य शिशोः जन्मचर्चा व्याप्ता अभवत् ।

तस्य पिता विचारयाते—अस्मिन् मम गृहे कः अवतरितः? तृतीयायां प्रौढावस्थायां मम मनसि मनसिजोत्पत्तिः कथं जाता? अस्य शिशोः माता कथं माम् आकृष्टवती? किम् अस्य दिव्यात्मनः अवतरणाय? यस्य मनसि कदापि कामः न उत्पन्नः स कथम् अस्य शिशोः जन्महेतुः अजायत? अस्य कारणं तु परमेश्वरः एव जानाति। सर्वथा निर्विकारस्य मम मनः मन्मथः कदापि न मथ्नाति स्म। अस्य माता अपि सद्गुणवती, सेवापरायणा, सद्गृहस्था, भगवद्भजननिरता नारीरूपेण काचन दिव्या शक्तिः इव प्रतीयते। इयं कमपि दिव्यं महात्मानं पुत्ररूपेण अजनयत्। अस्य शिशोः पालनानन्तरम् आवयोः जीवनस्य लक्ष्यं भगवद्भजनं तीर्थाटनमेव च भविष्यति इति आवयोः निर्णयः।

शिशोः माता चिन्तयति—मम उदरात् उत्पन्नः अयं शिशुः न जाने कः दिव्यात्मा अस्ति? मदनेऽनभिज्ञं मे मनः अस्यैव आत्मनः अवतरणाय एकदैव विकारग्रस्तम् अभवत्। अस्य शिशोः पालनं मम धर्मः अस्ति। अन्यथा संसारात् विरक्तः मम स्वामी तीर्थाटनं कर्तुम् एव इच्छति। भगवद्भजनं तु तस्य स्वभावः एव अस्ति। पत्युः अनुसरणं पत्न्याः धर्मः अस्ति। अतः शिशोः पालनं पोषणं च कृत्वा गाहस्र्थ्यम् अस्मै समर्प्य पतिम् अनुगमिष्यामि इति मम निश्चयः।

इत्थं सा विचारं कुर्वती एव आसीत् तावत् पुत्रः अरोदीत्। तस्य रोदने विचित्रः ध्वनिः आसीत्। यद्यपि स ध्वनिः स्पष्टाक्षरः न आसीत् तथापि तया सार्थकः इव अनुभूतः। प्रतीतः अभवत्—शिशुः अयं कथयति—पित्रोः सेवा मम धर्मः भविष्यति। अत एव यथासमयम् अहम् अपि भवन्तम् अनुसरिष्यामि। ध्वनेः अर्थम् अनुभूय माता विचारमग्ना अभवत्। चिन्तनतरङ्गात्यस्ता जाता—मम गर्भात् उत्पन्नः अयं शिशुः दिव्यात्मा परिलक्ष्यते। समागते गर्भे एव अस्मिन् अहम् अनुभूतवती आसम् — कोऽपि भक्तिमार्गं दर्शयति, भक्तये प्रेरयति, वीतरागत्वं शिक्षयति, मनसि वितृष्णां जागरयति, तीर्थदर्शनाय उत्प्रेरयति, भजने आनन्दम् अनुभावयति। धन्या अहम्, धन्यं मम जीवनम्।

समयः स्थिरतां न सेवते। संसारेण सह सोऽपि संसरति एव। अतः कदाचित् प्रभातः भवति तु कदाचित् सन्ध्या समागच्छति। कदाचित् दिनम् आयाति तु कदाचित् रजनी। कदाचित् वसन्तः स्वसुषमां दर्शयति तु कदाचित् ग्रीष्मः प्रचण्डताण्डवेन तापयति। कदाचित् वृष्टिः धरां प्लावयति तु कदाचित् शरत् स्वसौन्दर्यं दर्शयति। कदाचित् हेमन्तः सर्वान् कम्पयति तु कदाचित् शिशिरः अपि स्वभङ्गिमां दर्शयति। एवं दिनानि मासास्तु व्यतीताः एव वर्षम्



अपि व्यतीतम्। स शिशुः हस्तपादैः चलित्वा केवलं पादाभ्याम् अपि चलितुम् आरभत। हस्तपादैः चलनकाले यदा ग्रीवाभङ्गं कृत्वा मातरं पितरं च पश्यति तदा तौ भावविह्वलौ भूत्वा तं भगवन्तम् इव पश्यतः स्म। तस्य स्मितं दृष्ट्वा पितरौ यत् सुखम् अनुभवतः स्म तत् अवर्णनीयम्। तस्य धूलिधूसरितं शरीरं माता स्वस्या अञ्चलेन प्रोञ्छति पिता च स्वस्य उत्तरीयेण। यदा च पादाभ्यां तीव्रगत्या चलति तदा माता स्खलनभयात् व्यग्रा भवति।

इत्थं तस्य शिशोः शिशुलीलया केवलं पित्रोः गृहम् एव न अमोदत अपि तु परिवेशिनां गृहाणि अपि मोदमानानि जातानि। तस्य शिशोः समकालीनाः शिशवः अपि तेन शिशुना सह क्रीडितम् आरभन्त। तेषां क्रीडनेन सर्वेषां गृहाणि परमानन्दपूर्णानि भवन्ति स्म। यतः सः शिशुः असाधारणः आसीत्, अलौकिकः आसीत् अद्भुतः च आसीत्। तस्य मुखमण्डले विचित्रम् आकर्षणम्, स्मितौ विलक्षणा मोहकता, वचने अनिर्वचनीयः प्रभावः। तस्य क्रीडायाम् अपि गुरुजनानां सेवाभावः ईश्वरस्य भक्तेः च उन्मेषः लक्ष्यते स्म।

इत्थं यथा-यथा शिशुत्वम् उल्लङ्घ्य बालत्वं प्राप्तवान् तथा-तथा तस्य प्रभावः ग्रामस्य सर्वेषु बालकेषु व्याप्तिं लब्धवान्। तस्य ग्रामस्य बालकाः प्रातरुत्थाय स इव मातुः पितुः गुरुजनानां च चरणौ स्पृष्ट्वा प्रणामं कुर्वन्ति स्म। भगवद्भजनं कुर्वन्ति स्म। ग्रामस्य शिक्षालये आचार्येभ्यः नियमितरूपेण शिक्षां लभन्ते स्म । स्वाध्यायः तेषां स्वभाव एव आसीत्।

कालक्रमेण स एव बालकः 'श्रवणकुमार' नाम्ना प्रसिद्धः अभवत्। तस्य स्वभाववैशिष्ट्यस्य चर्चा ग्रामस्य सीमानम् उल्लङ्घ्य जनपदं प्राप्तवती। सः बालकः बालकत्वम् उत्क्रम्य कैशोरं लब्धवान्। किशोरतायाः अनन्तरं यौवनस्य दिशि पदविन्यासम् अकरोत्। येन क्रमेण अवस्थायाः उत्क्रमणं जातं तेन क्रमेण तस्य पितरौ प्रति भक्तिभावना अवर्द्धत। तयोः सेवा एव तस्य जीवनस्य एकमात्रं लक्ष्यं जातम्।

पितरौ तस्य वार्द्धक्यं प्राप्तवन्तौ। तयोः शरीरं शिथिलं जातम्। शरीरस्य चर्मसु सङ्कोचः परिलक्षितः। इन्द्रियाणि निष्क्रियतायाः दिशि चलितुं प्रारभन्त।

एतस्यामेव अवस्थायाम् एकस्मिन् दिने तौ पुत्रम् आहूय निकटस्थं कृत्वा कथितवन्तौ—तव सेवायां आवां सन्तुष्टौ। आवयोः इच्छा तीर्थाटनं कृत्वा कस्मिंश्चित् तीर्थे एव शेषजीवनं यापयितुं वर्तते। अतः आवां वाञ्छावः

यत् त्वं विवाहं कृत्वा गार्हस्थ्यं सञ्चालय।

पित्रोः वचनं श्रुत्वा श्रवणकुमारः सप्रश्रयम् अवदत्—प्रातःस्मरणीयौ वन्दनीयौ च पितरौ, मम इच्छा अपि भवन्तौ शृणुताम्। भवतोः सेवा एव मम जीवनस्य उद्देश्यम् अस्ति। मम कृते भवन्तौ एव लक्ष्मीनारायणौ स्तः। यत्र भवन्तौ स्थास्यतः तत्र अहं सेवया एव सन्तुष्टः भविष्यामि। मम एतस्मिन् निर्णये परिवर्तनं न भवेत्। अतः भवन्तौ एतस्मात् विपरीतां काम् अपि आज्ञां न दद्याताम् इति मम प्रार्थना।

पुत्रस्य निर्णयं श्रुत्वा पितरौ स्तब्धौ। यथासमयं तीर्थाटनाय चलनं भविष्यति इत्यस्य निर्णयं कृत्वा प्रसङ्गं समाप्य च स्व-स्वकार्येषु संलग्नाः।

पुनः कदाचित् श्रवणकुमारस्य पितरौ रहसि विचारयामासतुः—तीर्थाटनं न भविष्यति चेत् एतत् जीवनं निरर्थकत्वं यास्यति। तीर्थाटनाय यदि दृढतां करिष्यावः चेत् पुत्रः अपि गमिष्यति एव। आवयोः कृते गार्हस्थ्यं त्यक्तुं दृढः अस्ति। तत् आवां किं कुर्याव?

श्रवणकुमारमाता सम्मिलितविचाराभ्यां पृथक् भूत्वा विचार्य च प्रोक्तवती—अहं पुत्रं भवतः अधिकतरं जानामि। अयं सामान्यः जनः नास्ति। जन्मना एव महान् आत्मा अस्ति। अयम् आवयोः कृते एव अत्र वर्तते। अतः अयम् अपि चलतु । गार्हस्थ्यं ग्रामविकासाय समर्प्य वयं चलेम।

श्रवणकुमारस्य पिता अपि स्वीकृतवान्। धर्मात्मना पुत्रेण साकं शेषजीवनस्य समापनं समुचितम् एव।

एवं विचार्य निर्णयं च कृत्वा ताभ्यां पुत्रः सूचितः—कार्तिकमासस्य शुक्ले पक्षे षष्ठ्यां मङ्गलवासरे प्रातः अस्माभिः तीर्थाटनाय चलितव्यम् ।

निर्णयं श्रुत्वा श्रवणकुमारः सानन्दः पुलकितः च जातः।

एवं यथासमयं सर्वं गार्हस्थ्यं ग्रामविकासाय समर्प्य शुभे मुहूर्ते त्रयः प्राचलन्।

ग्रामात् बहिः निर्गत्य ते विचारितवन्तः- सर्वप्रथमं क्व गन्तव्यम् ? आर्यावर्ते अस्मिन् देशे तु बहूनि तीर्थानि विद्यन्ते। वृद्धावस्थायां सर्वत्र गमनं भवतु वा न भवतु, अतः सर्वप्रथमं काशी गन्तव्या अस्माभिः। काशी मोक्षदा



पुरी अपि कथ्यते। एवं त्रयः काशीं प्रति चलितुम् आरब्धवन्तः।

यत्र रात्रिः भवति तत्र विश्रामः। ग्रामस्य गृहस्थान् भोजनं याचित्वा श्रवणकुमारः आनयति, तदेव भुक्त्वा शयनं कुर्वन्ति। शयनात् पूर्वं श्रवणकुमारः पित्रोः चरणान् नोदयति स्म। प्रातः नित्यक्रियां कृत्वा याचितान्नावशेषेण लघ्वशनं कृत्वा चलनं प्रारभन्ते। एवं तीर्थात् तीर्थान्तरं यात्रा प्रारब्धा।

श्रवणकुमारः पित्रोः सेवायां लक्ष्मीनारायणयोः सेवायाः अनुभवं कुर्वाणः स्वजीवनञ्च धन्यं मन्यमानः मनसि मोदम् अनुभवति स्म।

यावत् शरीरे स्वल्पा अपि शक्तिः अवशिष्टा तावत् श्रवणकुमारस्य पितरौ तीर्थानां दर्शनं कुर्वन्तौ, पुत्रस्य भक्तिम् अनुभवन्तौ, भगवद्भजनं कुर्वन्तौ चलन्तौ आस्ताम्। काशीतः चलित्वा तीर्थराजस्य प्रयागस्य दर्शनम्, तदनन्तरं चित्रकूटस्य,मथुरावृन्दावनयोः,हरद्वारस्य बदरिनारायणस्य च यात्राम् अकुरुताम्।

इत्थं बहूनि दिनानि, बहवः मासाः कानिचित् वर्षाणि अपि व्यतीतानि।

वार्द्धक्येन, शारीरिकश्रमेण च उभयोः शरीरं शिथिलं जर्जरं च जातम्। चलनस्य शक्तिः नष्टा। सर्वोपरि उभयोः नेत्राणि अपि दर्शनशक्तिरहितानि अभवन्। बदरिनारायणस्य यात्रा वस्तुतः वृद्धानां कृते कष्टप्रदा भवति। पर्वतप्रदेशस्य अधित्यका, उपत्यका शैत्यस्य च अधिकता सर्वे मिलित्वा यूनः अपि शिथिलान् कुर्वन्ति, वार्द्धक्येन शिथिलानां का कथा ?

श्रवणकुमारः बदरिनारायणस्य तस्यां यात्रायाम् अनुभूतवान्—दोलायाम् उपावेश्य वृद्धाः अपि उह्यन्ते। स च समुदारान् यात्रिणः धनं याचित्वा उभयोः कृते द्वयोः दोलयोः निर्माणं कारयित्वा द्वयोः मध्ये एकं काष्ठदण्डं योजयित्वा पितरौ वोढुम् आरभत।

तदानीं पित्रोः हृदि महत् कष्टम् अभवत्। पुत्रस्य कष्टम् अनुभूय तु माता यदा-तदा अनशनं विधाय प्राणान् त्यक्तुम् अपि चिन्तयति स्म। आत्महत्या अपि पापम् अस्ति इति विचार्य एव प्राणत्यागस्य विचारं त्यजति स्म। पिता स्वजीवनं धिक्कुर्वन् पुत्रकष्टेन यदा-कदा शोकाकुलः अपि भूत्वा कथयति—वृद्धावस्थायां तीर्थयात्रायाः कार्यं तु दुष्करं भवति एव अन्धत्वेन तु इदं कार्यं नैव कर्तव्यम्।

पित्रोः कष्टस्य अनुभूतिं ज्ञात्वा श्रवणकुमारः कथयति–हे पितः, अयि मातः, कालक्रमस्य प्रभावेण यद्यपि भवन्तौ वृद्धौ जर्जरौ च अभवताम्। न केवलम् इत्येव अपि तु भवन्तौ दृष्टिशक्तिरहितौ अपि जातौ तथापि भवन्तौ चिन्तां मा कुरुताम्। भवतोः अयं सुतः श्रवणकुमारः पूर्णतया स्वस्थः अस्ति, हृष्टपुष्टाङ्गः अस्ति। अस्य शरीरस्य कस्यापि अङ्गे न काचन पीडा अस्ति। अयं भवतोः सेवां लक्ष्मीनारायणयोः सेवां मनुते।

तदानीं पितरौ पुत्रस्य मस्तकं स्कन्धं पृष्ठप्रदेशं च स्पृष्ट्वा तस्य शरीरस्य पुष्टतां स्वच्छतां च अनुभूतवन्तौ, कथितवन्तौ च–हे पुत्र! त्वम् आवयोः एकाम् आज्ञां पालय। वद, पालयिष्यसि न वा ?

श्रवणकुमारः अवदत्–भवतोः सर्वाः आज्ञाः पालयामि पालयिष्यामि च। किन्तु, एकाम् आज्ञां सेवया वञ्चितत्वस्य आज्ञां न पालयिष्यामि।

माता कथितवती - सा आज्ञा न, किन्तु इयम् आज्ञा त्वया अवश्यं पालनीया यत् तीर्थान्तरं न नीत्वा त्वम् आवाम् अयोध्यायाः निकटस्थं तत् उपवनं नय यत्र बहूनां महात्मनां पर्णकुट्यः सन्ति। तत्रैव एकां पर्णकुटीं निर्माय तस्याम् एव आवयोः सेवा त्वया करणीया।

श्रवणकुमारेण कथितम्–यद्यपि आर्यावर्तस्य बहूनि दर्शनीयानि तीर्थानि अवशिष्टानि सन्ति, दर्शनशक्तिरहितयोः भवतोः यात्रा तु भवितुं शक्यते, किन्तु स्थानानां दर्शनानि न भविष्यन्ति। अतः भवतोः इयम् आज्ञा मया स्वीक्रियते।

एवं निश्चित्य मातृ-पितृ-भक्तः श्रवणकुमारः तौ ताभ्यां दोलाभ्याम् आवहन् मार्गस्य कष्टानि अगणयन्, अयोध्यां समया सरयूतटे अवस्थितं समाधियोग्यम् अतिरम्यम् उपवनं प्रति अचलत्। मातृ-पितृसेवापरायणस्य श्रवणकुमारस्य सेवाभावनां निरीक्ष्य मार्गस्य तीर्थयात्रिणः विस्मयविमुग्धाः भवन्ति स्म। केचित् कथयन्ति–धन्योऽयं मानवशरीरधारी कश्चित् दिव्यात्मा अस्ति। एतावता कष्टसाध्येन अपि परिश्रमेण कदाचित् शरीरव्यथां मनोव्यथां वा न प्रकटयति। पित्रोः इच्छाम् एव सर्वस्वं मनुते। तयोः शरीरं स्वच्छीकुरुते, वस्त्राणि क्षालयति। याचित्वा एव तौ प्रेम्णा भोजयति, रात्रौ विश्रामसमये प्रतिदिनं तयोः पादान् निमेलयति। सदा सादरं मधुरं च वचनं ब्रवीति, कथयति च–मम कृते एतौ मम पितरौ एव लक्ष्मीनारायणौ स्तः। कश्चित् तु इदम् अपि कथयति–एतादृशः मातृ-पितृ-भक्तः संसारे न भूतो न भविष्यति।



मातापितरौ पुत्रस्य भक्तिं चिन्तयन्तौ परममुग्धौ आस्ताम्। तस्य कर्तव्यपरायणता सेवाभावना च पितरौ यावत् एव सीमिते न आस्ताम्। सः मार्गस्थान् अन्यान् यात्रिणः अपि साहाय्येन प्रभावयति। कस्मैचित् मार्गश्रमेण व्यथिताय अपि जलम् आदाय ददाति। कस्यचित् पादयोः लग्नानि कण्टकानि निःसारयति। एवं सर्वेषाम् आशीर्वादान् गृह्णन् पितरौ दोलाभ्याम् आवहन् मोदमानः चलति । तस्य मनः सदा पित्रोः प्रसन्नतां वाञ्छति। उभयोः कस्यापि कमपि शब्दं श्रुत्वा ध्यानं ददाति । पितरौ अपि सदा तस्य कल्याणाय परमात्मानं प्रार्थयतः। मार्गे क्वचित् वनानां दृश्यानि, पर्वतानाम् उन्नतानि शिखराणि च अवलोकयन्, निर्झराणां झरझरध्वनिम्, खग-मृगसमूहानां विविधं ध्वनिं च आकर्णयन्, सतां महात्मनां च दर्शनानि कुर्वन्, अयोध्यानिकटस्थम् उपवनं ध्यायन् चलति। इत्थं सः समयस्य गत्या सूर्यास्तं सूर्योदयं च अवलोकयन्, कदाचित् प्रकाशस्य अन्धकारस्य च अनुभवं कुर्वन्, अनेकान् दिवसान्, मासान्, अनेकानि वर्षाणि च उल्लङ्घ्य अयोध्यां समया अवस्थितम् उपवनं प्राप्तवान्।

श्रवणकुमारस्य जन्मभूमेः नैकट्येन तत् उपवनं पूर्वतः एव परिचितम् आसीत्। चिरात् समागतेन कारणेन यद्यपि तत्र अवस्थिताः साधवः महात्मानश्च सुपरिचिताः न आसन् तथापि श्रवणकुमारस्य मातृपितृकथया परिचिताः आसन्। अतः श्रुत्वा एव परिचयं तत्रत्या महात्मानः श्रवणकुमारस्य पित्रोः वार्द्धक्यम् अन्धत्वं च वीक्ष्य महाकालस्य प्रभावं वर्णयन्तः तयोः तस्य च स्वागतम् अकुर्वन्। श्रवणकुमारस्य मातृ-पितृभक्तं तयोः मुखात् श्रुत्वा तं भूरि-भूरि प्राशंसन्। तस्मिन् एव उपवने एकां कुटीं निर्माय तयोः शेषजीवनस्य यापनाय व्यवस्थाम् अकुर्वन्। तस्य उपवनस्य महात्मानः, साधवः संन्यासिनश्च श्रवणकुमारस्य मातृ-पितृ-भक्तिम् अवलोक्य विस्मयविमुग्धा आसन्। सः श्रवणकुमारः प्रतिदिनं प्रातः ब्राह्ममुहूर्ते उत्थाय मातरं पितरम् एव भजते। तयोः नित्यकर्मनिवृत्तये सहयोगं करोति। स्नानं कारयति, वस्त्राणि स्वच्छीकरोति, वस्त्रधारणार्थं सहयोगं करोति। पादयोः प्रणिपत्य प्रणामं करोति। अल्पाहारस्य कृते कन्दमूलफलादीनां व्यवस्थां सम्पादयति। समीपस्थानां ग्रामाणां जनान् भोजनं याचित्वा आनयति। समस्तं समयं तयोः कृते एव समर्पयति। तयोः आदेशेन स्वयमपि किञ्चित् भुङ्क्ते। यदि कश्चित् पृच्छति–तव जीवनस्य किम् उद्देश्यम्? तदा समुत्तरयति–जननीजनकयोः सेवा एव मम जीवनस्य उद्देश्यम्। मम कृते पितरौ एव लक्ष्मीनारायणौ। यदा-कदा ध्यानमग्नः स्तौति–

मातः पूज्या पिता पूज्यो लक्ष्मीनारायणावुभौ ।
तयोर्ध्यानञ्च पूजाञ्च जीवनस्य फलं मम ।।1।।

जननी गर्भधात्री या सर्वसह्या धरेव सा ।
यस्या रक्तेन मांसेन रसेन मम जीवनम् ।।2।।

शैशवे या कृता सेवा तस्या मुक्तिः कथं भवेत् ?
सेवयैव हि तन्मुक्तिर्नान्यः पन्था विलोक्यते ।।3।।

जन्मनः कारणं योऽस्ति जनकः शुभपुण्यभाक् ।
भोजनं वसनं सौख्यं सन्तानेभ्यो ह्युपार्जति ।।4।।

तयोः कृतोपकारस्य प्रत्युपकारः कथं भवेत् ?
सेवयैव च नान्येनोपायेनापि च केनचित् ।।5।।

अतः सेवाव्रतं धृत्वा नित्यं सेवापरायणः ।
जीवनस्य फलं प्राप्तं मार्गो नाऽन्यो विलोक्यते ।।6।।

माता लक्ष्मीः पिता विष्णुस्तयोः पूर्णमिदं जगत् ।
इति मत्वा जपेन्नित्यं तयोर्गुणगणं मुदा ।।7।।

एवं श्रवणकुमारस्य मातृपितृसेवायाः भक्तेः च चर्चा व्याप्तिं प्राप्तवती । आर्यावर्तस्य प्रतिकोणं स चर्च्यः अभवत् । अनुकरणीयः आदर्शः इव अमन्यत । तस्य उपवनस्य आश्रमेषु तपस्यानिरतेषु तपस्विषु केचन तु गृहं प्रतिजग्मुः ये मातरं पितरं च त्यक्त्वा तपः तप्तुम् आगतवन्तः आसन् । आर्दशचरितस्य अयं प्रभावः न तु तस्य प्रवचनस्य । चरितं विना प्रवचनस्य किमपि महत्त्वं नास्ति । वक्तव्यकर्तव्ययोः मध्ये कर्तव्यं श्रेष्ठम् । कर्तव्यं विना वक्तव्यं निरर्थकं जायते । तदानीम् इयम् उक्तिः प्रायः स्मर्यते स्म–

कर्तव्यवक्तव्ययोस्तु कर्तव्यमतिरिच्यते ।
कर्तव्यं विना कुत्रापि वक्तव्यं हि निरर्थकम् ।।

इक्ष्वाकुवंशीयस्य धर्मात्मनः अयोध्याधिपतेः राज्ञः अजस्य शासनस्य इदं वैशिष्ट्यम् आसीत् । तस्य रघोः राज्ञः दशरथः नाम सुतः आसीत् । स च सुदर्शनः सुकुमारः सकलगुणगणयुतः अजनन्दनः कैशोर्यं कौमार्यं च उल्लङ्घ्य यौवनस्य दिशि अग्रसरः आसीत् । स च ब्रह्मचर्येण तपसा च गुरोः वसिष्ठस्य



आश्रमे सकलशास्त्राणि अधीत्य शस्त्रास्त्रविद्यापारङ्गतेभ्यः गुरुभ्यः अपि शस्त्रास्त्रविद्यायाः अपि दक्षतां प्राप्तवान् आसीत् । सः शब्दभेदिशरसन्धाने अपि निपुणः आसीत् ।

शरत्कालः आसीत् । वर्षाकालस्य समापनं तु आसीत् । किन्तु तस्य पूर्णः प्रभावः न समाप्तः आसीत् । यदा-कदा मेघाः दृश्यन्ते स्म । यदा-कदा स्वल्पा वृष्टिः अपि भवति स्म । अस्य एव शरत्कालस्य उषःकालः आसीत् । आकाशः पूर्णतया निर्मलः न आसीत् । यत्र-तत्र नीरदानां खण्डानि दृश्यन्ते स्म । अत एव प्रकाशस्य समये अपि स्वल्पं तमः आसीत् । युवराजः दशरथः धनुषि शब्दभेदिबाणं सन्धाय नगरात् बहिः निःसृत्य भ्रमणं करोति स्म । हिंसकपशुभ्यः प्रजारक्षणार्थम् एव आखेटस्य आवश्यकता भवति स्म ।

तदानीम् एव श्रवणकुमारः उपवनस्य कुटीरात् निःसृत्य पित्रोः पिपासाशमनार्थं घटम् आदाय जलम् आनेतुं सरयूतटम् आगतवान् आसीत् । यदा सः तीरम् अवतीर्य घटं जले ब्रूडयितुं प्रारभत तदा 'भब-भब' इति ध्वनिः अभवत् । सः ध्वनिः युवराजस्य दशरथस्य श्रुतिरन्ध्रं प्राविशत् । सः अनुमितवान् अयं ध्वनिः तस्यैव गजस्य शुण्डात् आकृष्य मुखे जलाऽऽकर्षणस्य अस्ति यः प्रतिदिनं प्रजाजनस्य सस्यपूर्णानि क्षेत्राणि उद्यानानि च ध्वस्तीकरोति । यदि कश्चित् सस्यं रक्षति तदा तम् अपि निहन्ति । एवं विचिन्त्य तं ध्वनिम् अभिलक्ष्य शब्दभेदिनं शरं त्यक्तवान् । सः घातकः शरः नतो भूत्वा घटे जलं पूरयतः श्रवणकुमारस्य कटिप्रदेशं छिन्दन् प्राविशत् । सहसा तस्य मुखात् 'हा पितरौ' इति शब्दः निर्गतः । 'हा पितरौ' इति व्यथापूर्णं शब्दं श्रुत्वा युवराजः व्याकुलः अभवत् । तस्य मुखात् अपि निर्गतम्–हा ! मया किं कृतम् ? कश्चित् मानवः लक्ष्यीकृतः । हा ! अस्मात् पापात् कथम् उद्धारः भविष्यतीति विचिन्तयन् वेगेन चलन् तत्र गत्वा उपवनस्य आश्रमवासिनं ब्रह्मचारिणम् अपश्यत् । स शरेण आहतः ब्रह्मचारी करुणेन स्वरेण कथितवान्–मम जराजर्जरौ पितरौ पिपासया व्याकुलौ स्तः । पूर्वं जलपूर्णम् एतं घटं नीत्वा उपवनस्य पर्णकुटीरं गत्वा तौ जलं पायय, तदनन्तरं मम कटिप्रदेशात् शरम् इमं निष्कासय । मम शरीरे असह्या पीडा अस्ति ।

व्यथितहृदयः, साश्रुनयनः, कृतापराधऽऽत्रोधः दशरथः अब्रवीत्–ब्रह्महत्या इति पातकेन नरकः अपि मह्यम् असूयिष्यति । इक्ष्वाकुवंशीयस्य धर्मात्मनः

'अज' स्य पुत्रः भूत्वा अपि अहं किं कृतवान्? हे परमात्मन्, एतस्मात् जघन्यपापात् मम कथं मुक्तिः?

आहतेन ब्रहमचारिणा पुनः प्रार्थनास्वरेण निवेदितम्–राजकुमार, खेदं मा वह । अहं ब्राह्मणकुमारः न अस्मि । मम परमपूज्यः पिता वैश्यकुलोद्भवः परमपूजनीया माता च शूद्रकुलोत्पन्ना अस्ति । अतः त्वं ब्रह्महत्या इति पापात् मा भैषीः। पुनः अङ्गुल्या उपवनस्य मार्गं निर्दिश्य पितरौ जलं पाययितुं प्रार्थितवान्, अनुरोधस्य च स्वरेण कथितवान् यत् दिवंगते मयि पितरौ मम यावत् जीवताम् तावत् तयोः सेवायाः प्रबन्धः त्वया करणीयः। शीघ्रतां कुरु। पिपासितौ मम पितरौ शीघ्रं तर्पय। त्वरितम् आगत्य शरं निष्कासय येन अहं प्राणान् त्यजानि।

किंकर्तव्यविमूढः अपि दशरथः जलपूर्णं घटम् आदाय निर्दिष्टमार्गेण उपवनस्थितं तं कुटीरं गत्वा आहतस्य श्रवणकुमारस्य जराजर्जरौ नेत्रहीनौ पितरौ तं दुःखदं समाचारं न्यवेदयत्।

तत् श्रुत्वा पिपासया व्याकुलौ अपि तौ हस्ताभ्यां वक्षःस्थलं ताडयन्तौ दशरथं गदितवन्तौ यत् त्वरितम् आवां तत्र नय यत्र आवयोः पुत्रः म्रियमाणः वर्तते। यद्यपि युवराजः दशरथः तौ प्रार्थितवान्–भवतोः जीवनपर्यन्तम् अहं स्वहस्ताभ्यां सर्वाः सेवाः करिष्यामि। तस्य पुत्रस्य स्थाने भवन्तौ माम् एव पुत्रं मन्येताम्। तथापि भाविना पुत्रशोकेन संतप्तौ केवलम् इत्येव कथितवन्तौ यत् पूर्वम् आवां तत्र नय। युवराजः दशरथः दोलयोः काष्ठं स्कन्धे निधाय पापिनम् आत्मानं धिक्कुर्वन् तौ तत्र नीतवान्।

आहतस्य पुत्रस्य दूरतः एव आर्त्तनादं श्रुत्वा तौ अतिविह्वलौ जातौ। तत्र गत्वा पुत्रं च स्पृष्ट्वा दशरथम् आदिष्टवन्तौ यत् यदि त्वं कल्याणं वाञ्छसि चेत् शीघ्रं काष्ठानि एकीकृत्य चितां रचय। तस्याम् अग्निं प्रज्वालय अन्यथा त्वां भीषणं शप्स्यावः। आहतः श्रवणकुमारः राजकुमारं दशरथं प्रार्थयत–मम पितरौ यत् कथयतः तत् शीघ्रं कृत्वा मम शरीरात् शरं निष्कासय अन्यथा असह्या पीडा मां पीडयति।

विवशः युवराजः दशरथः तैः यथा यथा निर्दिष्टं तथा तथा कृतवान्। प्रज्वलिते अग्नौ प्रवेशात् पूर्वं तौ जराजर्जरौ नेत्रहीनौ आसन्नपुत्रशोकेन संतप्तौ युवराजं दशरथम् अशपताम् यत् त्वम् अपि वार्द्धक्ये पुत्रशोकेन संतप्तः प्राणान्



त्यक्ष्यसि। इति कथयित्वा तौ प्रज्चलिते अग्नौ प्रविश्य भस्मीभूतौ जातौ।

युवराजः दशरथः आहतं श्रवणकुमारं सम्बोध्य प्रार्थितवान्–भवान् अपि मां शपतु। मम उद्धारः कथं भविष्यति ? आहतेन श्रवणकुमारेण कथितम्–युवराज, पितृभ्यां दत्ते अभिशापे अहं संशोधनं करोमि यत् भवान् पुत्रस्य विरहेण प्राणान् त्यक्ष्यति, म्रियमाणस्य वा मृतस्य पुत्रस्य न। पुनः प्रार्थितवान् यत् शीघ्रतया शरं निष्कासय येन अहम् अपि प्राणान् त्यजानि। युवराजेन दशरथेन तथा कृतम्।

तदानीम् अपूर्वं दृश्यम् उत्पन्नम् । आकाशात् विमानम् एकम् अवातरत्। विमानात् एकम् अद्भुतं व्यक्तित्वम् बहिः निर्गतम्। तेन व्यक्तित्वेन स्वकरेण श्रवणकुमारस्य शरीरम् अस्पृशत्। मातृ-पितृ-भक्तः श्रवणकुमारः विगतव्यथः अभवत्। व्यक्तित्वेन तेन कथितम्–त्वम् अनेनैव शरीरेण स्वर्गं चल। तव पितरौ तु लक्ष्मीनारायणयोः लीनौ जातौ। तेन विलक्षणेन व्यक्तित्वेन स्वपरिचयः दत्तः–अहं स्वर्गस्य राजा देवराजः अस्मि। तव मातृपितृभक्त्या प्रसन्नः भूत्वा आगतः अस्मि। यावत् संसारः स्थास्यति तावत् भूतले तव चर्चा भविष्यति। तव स्मरणमात्रेण मातृपितृभक्तिभावना वर्द्धिष्यते। इति कथयित्वा दशरथं च सम्बोध्य कथितवान् यत् त्वं पुत्रविरहेण प्राणान् त्यक्त्वा स्वर्गम् आगमिष्यसि। किन्तु, एतस्मात् कालात् परम् इमां घटनां विस्मरिष्यसि। शरीरत्यागसमये एतस्याः घटनायाः स्मरणं भविष्यति।

युवराजं दशरथम् इत्थं कथयित्वा राजधानीं च सम्प्रेष्य श्रवणकुमारं देवराजः इन्द्रः पुनः कथितवान्–विमानम् आरुह्य उपविश स्वर्गं च चल।

श्रवणकुमारः देवराजम् इन्द्रं प्रार्थयामास–प्रभो, यदि भवान् प्रसन्नः अस्ति चेत् पित्रोः स्थाने लक्ष्मीनारायणयोः दर्शनस्य पूजायाः प्रार्थनायाः च वरदानं मह्यं ददातु। यतः भवान् एव कथितवान् अस्ति तव पितरौ लक्ष्मीनारायणयोः लीनौ जातौ। अतः अहं स्वर्गे वा यत्र कुत्र तिष्ठानि लक्ष्मीनारायणयोः पूजाम् अर्चनां प्रार्थनाञ्च कुर्याम्। एवमस्तु इति कथयित्वा इन्द्रः तं श्रवणकुमारं विमाने उपावेश्य स्वर्गं नीतवान्। श्रवणकुमारः स्वर्गेऽपि यदा ध्यायति तस्य हृदि लक्ष्मीनारायणौ साकारौ भवतः। स च मनसि एव पूजाम् अर्चनां च कृत्वा अनेन स्तोत्रेण प्रार्थयते–

अयि तथा युगलौ पितरौ मम
सकलसंसृति-सृष्टिनियामकौ ।
मनसि मे स्मरणेन समागतौ
अहरहश्चरणा युवयोः स्मृताः ।।1।।

जननि हे जनतापविनाशिनि
प्रणतपालिनि पापविनाशिनि !
अखिललोकनियन्त्रणकारिणि
मम सदा नितरां हृदये वस ।।2।।

अयि पितः करुणामय हे प्रभो,
सकरुणो भव त्वं मयि बालके।
मम च जन्म यदा भुवि संभवेत्
तदपि तौ पितरौ हि सुसेवितौ ।।3।।

अयि विभो भुवनत्रयपालक
यदपि स्वर्गसुखं सुलभं सदा।
इह तथापि च तौ पितरौ विना
अहह ! नाथ युवां पितरौ मम ।।4।।

मम कृते खलु ध्यानसमागतौ
शुचितमौ सुभगौ प्रियदर्शनौ ।
जगति जन्मगतं मम सार्थक–
महरहः प्रणमामि पुनः पुनः ।।5।।

आश्विनकृष्ण-अष्टमी, रविवासरः
२०५५
जीवितपुत्रिकाव्रतम्
१३/९/९८

# 'आरण्यक'स्य नियमाः

1. संस्कृतप्रसारपरिषद्, आरा-पक्षत इदं षाण्मासिकं शोधपत्रं संस्कृतेन चैत्र-आश्विनमासयोः (मार्च-सितम्बर) प्रकाश्यते । वर्षारम्भः चैत्रात् (मार्च तः) मन्यते ।
2. ग्राहकत्वं पूर्णवर्षस्यैव स्वीक्रियते । मध्येवर्षं ग्राहकत्वं काङ्क्षतः पूर्णवर्षस्य शुल्कमपेक्ष्यते । तादृशाय ग्राहकाय वर्षस्य पूर्वप्रकाशितोऽङ्कः उपलब्धौ सत्यां प्रेषयिष्यते ।
3. वार्षिकं शुल्कं त्रिंशत् (३०) रूप्यकाणि, तथा च एकस्याङ्कस्य पञ्चदश रूप्यकाणि वर्तते । शुल्कं धनादेश/ड्राफ्टमुखेन प्रेषणीयम् ।
4. विमर्शात्मका अनुसन्धानात्मकाश्च शास्त्रीया अप्रकाशितपूर्वा उच्चस्तरीया गम्भीराश्च मौलिकनिबन्धाः प्रकाशनाय गृह्यन्ते ।
5. काव्य-नाटक-चरित्रवर्णन-व्यङ्ग्य-हास्यसम्बद्धा नव्या रचना अत्र स्थानं न लभन्ते ।
6. प्रकाशनाय प्रेषिताः सर्वविधा रचनाः शुद्धा एकस्मिन् पत्रपृष्ठे सुस्पष्टाक्षरैः लिखिताः टङ्किताः वा स्युः । रचनाऽन्ते रचयितुः आवाससङ्केतः पदनिर्देशश्च उल्लिखितौ स्याताम् ।
7. प्रकाशितसंस्कृतकाव्यनाटकाऽऽलोचनादिग्रन्थानां समीक्षार्थं सम्बद्धग्रन्थस्य प्रतिकृतिद्वयं सम्पादकं प्रति प्रेषणीयम् ।
8. अस्वीकृता लेखा निर्धारित 'स्टाम्प'-प्राप्त्यनन्तरं प्रत्यावर्तयितुं शक्याः ।
9. लेखकेभ्यः तत्प्रकाशितलेखानां पञ्च प्रतिरूपाण्यपि दीयन्ते ।
10. लेखानां प्रकाशनस्य सम्पादनस्य च सर्वाधिकारः सम्पादकाधीनः ।
11. पत्रसम्बद्धः सर्वविधपत्रव्यवहारः धनादेशद्वारा शुल्कप्रेषणञ्च **डा० गोपबन्धु मिश्रः, सम्पादकः, आरण्यकम्, मारुतिमन्दिरम्, प्रकाशपुरी, आरा ( विहारः )-802301** इति सङ्केतेन विधेयम् ।

❖